# Shrirama Navaratnasara Sangrahah

# શ્રીરામનવરત્નસારસઙ્ગ્રહઃ

## Document Information

Text title : Rama Navaratna Sara Sangraha

File name : rAmanavaratnasArasangraha.itx

Category : raama, nava, sangraha

Location : doc_raama

Proofread by : Mrityunjay Pandey

Latest update : October 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 15, 2025

*sanskritdocuments.org*

# શ્રીરામનવરત્નસારસઙ્ગ્રહઃ

## અધ્યાય ૧

મઙ્ગલાચરણમ્ ।
મત્સ્યઃ કૂર્મો વરાહો નરહરિરતુલો વામનો યામદગ્નિઃ
સભ્રાતા કંસશત્રુઃ કરુણમયવપુઃ મ્લેચ્છવિધ્વંસનૈકઃ ।
એતે ચાન્યેઽપિ સર્વે તરણિકલભુવો યસ્ય જાતાઃ કલાંશૈઃ
તં વ્યાપ્તં બ્રહ્મતેજો વિમલસુખમયં રામચન્દ્રં નમામિ ॥ ૧॥

સર્વે લોકાઃ સશોભાસ્તદુપરિ સુખમામૂલરૂપા ત્વયોધ્યા
તસ્યાં રામઃ સસીતો વિહરતિ સતતં ભૃત્યસંવેષ્ટિતશ્ચ ।
અદ્વૈતાખણ્ડરૂપો વિમલગુણમયો બ્રહ્મહર્ષપ્રયુક્તો
યં ધ્યાયન્ત્યેવ નિત્યં વિધિહરિગિરિશાશ્ચાપિ સર્વે તથાન્યે ॥ ૨॥

નિત્યં નૌમિ ગુરું ગણેશ્વરમજં દેવીં તથા ભારતીં
શેષં ચૈવ તથા શિવં કપિવરં વ્યાસં ચ કુમ્ભોદ્ભવમ્ ।
વાલ્મીકિં ચ સુરર્ષિમેવ સ શુકં તીર્થં સરય્વાદિકં
સાકેતાદિ પુરાણિરામચરણઃ સ્વાન્તઃ પુરાનન્દદમ્ ॥ ૩॥

શ્રીરામાયણવેદશાસ્ત્રગદિતં તત્ત્વં પરં નાટકે
યત્તન્ત્રસ્મૃતિસંહિતાસુ મુનિભિઃ સારં પુરાણેષ્વપિ ।
શ્રીરામસ્ય રસં વિરિઞ્ચિહનુમદ્વ્યાસાદિભિઃ શમ્ભુના
નામ્ના ગુમ્ફતિ ભક્ત રામચરણાખ્યો માલિકાં તન્મયીમ્ ॥ ૪॥

ભવાબ્ધિ સન્તારકં રામનામં શ્રીરામરૂપં પરતઃ પરઞ્ચ ।
શ્રીરામધામં પ્રકૃતેઃ પરં ચ સર્વાન્ પરાન્ વિદ્ધિતદસ્ત્ર સઙ્ઘાન્ ॥ ૫॥

અનેકશાસ્ત્રં બહુવેદિતવ્યં સ્વલ્પશ્ચ કાલો બહુવિઘ્નયુક્તઃ ।
યત્સારભૂતં તદુપાસનીયં હંસો યથા ક્ષીરમિવામ્બુમિશ્રમ્ ॥ ૬॥

તત્ર પ્રમાણં મહાસારસ્વતે (એવં ચન્દ્રકીર્તિ ટીકા)-

સામાન્યશાસ્ત્રતો નૂનં વિશેષો બલવાન્ભવેત્ ।
પરેણ પૂર્વબાધો વા પ્રાયશો દૃશ્યતામિહ ।
બહુવ્યાપકશ્ચ સામાન્યં અલ્પવ્યાપકઃ વિશેષઃ ॥ ૭॥

બૃહત્ શ્રીહનુમન્નાટકે વાક્યં-
ઇદં શરીરં શતસન્ધિજર્જરં પતત્યવશ્યં પરિણામદુર્વહમ્ ।
કિમૌષધં પૃચ્છસિ મૂઢ! દુર્મત્તે! નિરામયં રામરસાયનં પિબ ॥ ૮॥

મહાશમ્ભુસંહિતાયાં શિવવાક્યં રામભક્તાન્ પ્રતિ-
મુક્તિસ્ત્રીકર્ણપૂરૌ મુનિહૃદયવયઃ પક્ષતીતીરભૂમૌ
સંસારાપારસિન્ધોઃ કલિકલુષતમસ્તોમસોમાર્કબિમ્બૌ ।
ઉન્મીલત્પુણ્યપુઞ્જદ્રુમલલિતદલે લોચને ચ શ્રુતીનાં
કામં રામેતિ વર્ણૌ શમિ હિ કલયતાં સન્તતં સજ્જનાનામ્ ॥ ૯॥

શ્રીહનુમન્નાટકે વાક્યં-
કલ્યાણાનાં નિધાનં કલિમલમથનં પાવનં પાવનાનાં
પાથેયં યન્મુમુક્ષોઃ સપદિ પરપદપ્રાપ્તયે પ્રસ્થિતસ્ય ।
વિશ્રામસ્થાનમેકં કવિવરવચસાં જીવનં સજ્જનાનાં
બીજં ધર્મદ્રુમસ્ય પ્રભવતુ ભવતાં ભૂતયે રામનામ ॥ ૧૦॥

વારાહપુરાણે શઙ્કર વાક્યં પાર્વતીં પ્રતિ-
દૈવાચ્છૂકરશાવકેન નિહતો મ્લેચ્છો જરાજર્જરો
હારામેણ હતોઽસ્મિ ભૂમિ પતિતો જલ્પંસ્તનું ત્યક્તવાન્ ।
તીર્ણો ગોષ્પદવદ્ભવાર્ણવમહો નામ્નઃ પ્રભાવાદહો
કિં ચિત્રં યદિ રામનામ રસિકાસ્તે યાન્તિ રામાસ્પદમ્ ॥ ૧૧॥

પદ્મમહાપુરાણે શ્રીશિવવાક્યં પાર્વતીં પ્રતિ-
યે યે પ્રયોગાસ્તન્ત્રેષુ તૈસ્તૈર્યત્સાધ્યતે ફલમ્ ।
તત્સર્વં સિદ્ધ્યતિ ક્ષિપ્રં રામનામેતિ કીર્તનાત્ ॥ ૧૨॥

ભૂતપ્રેતપિશાચાશ્ચ વેતાલાશ્ચેટકાદયઃ ।
કૂષ્માણ્ડાઃ રાક્ષસાઃ ઘોરાઃ ભૈરવાઃ બ્રહ્મરાક્ષસાઃ ।
શ્રીરામનામગ્રહણાત્ પલાયન્તે દિશો દશ ॥ ૧૩॥

બ્રહ્માણ્ડપુરાણ ઉત્તરખણ્ડે અધ્યાત્મરામાયણે વાલિ વાક્યં શ્રીરામં પ્રતિ-
યન્નામ વિવશો ગૃણન્ મ્રિયમાણ પરં પદમ્ ।
યાતિ સાક્ષાત્ ત્વમેવાસિ મુમૂર્ષો મે પુરઃસ્થિતમ્ ॥ ૧૪॥

નૃસિંહપુરાણે શ્રીપ્રહલાદ વાક્યં-
રામનામ જપતાં કુતો ભયં સર્વતાપશમનૈકભેષજમ્ ।
પશ્ય તાત મમ ગાત્રસન્નિધૌ પાવકોઽપિ સલિલાયતેઽધુના ॥ ૧૫॥

બ્રહ્મયામલતન્ત્રે બ્રહ્મણો વાક્યં નારદં પ્રતિ-
રામ નામ સદા નન્દો રામ નામ સદા ગતિઃ ।
રામ નામ સદા તુષ્ટો રામ નામ સ્વરૂપકઃ ॥ ૧૬॥

રામ નામ પરો વેદો રામ નામ સદા શુચિઃ ।
રામ નામ પરો યોગા રામ નામ પરો ધ્વનિઃ ॥ ૧૭॥

રામ નામ પરં બીજં રામ નામ પરં જગત્ ।
રામ નામ પરો મન્ત્રો રામ નામ પરા ક્રિયા ॥ ૧૮॥

રામ નામ પરો યજ્ઞો રામ નામ પરો જપઃ ।
રામ નામ પરં સારં રામો લક્ષ્મી સમાવૃતઃ ॥ ૧૯॥

સ્કન્દપુરાણે કાશીખણ્ડે-
પેયં પેયં શ્રવણ પુટકૈ રામ નામાભિ રામં
ધ્યેયં ધ્યેયં મનસિ સતતં તારકં બ્રહ્મ રૂપમ્ ।
જલ્પન જલ્પન પ્રકૃતિ વિકૃતૌ પ્રાણિનાં કર્ણમૂલે ।
વીથ્યાં વીથ્યામટતિ જટિલઃ કોપિ કાશી નિવાસી ॥ ૨૦॥

સનત્કુમાર સંહિતાયાં વેદવ્યાસ વાક્યં યુધિષ્ઠિરં પ્રતિ-
શ્રીરામેતિ પરં જાપ્યં તારકં બ્રહ્મ સંજ્ઞકમ્ ।
બ્રહ્મહત્યાદિ પાપઘ્ન મિતિ વેદ વિદો વિદુઃ ॥ ૨૧॥

શ્રીરામ રામેતિ જના યે જપતિ ચ સર્વદા ।
તેષાં ભુક્તિશ્ચ મુક્તિશ્ચ ભવિષ્યતિ ન સંશયઃ ॥ ૨૨॥

હિરણ્યગર્ભ સંહિતાયાં અગસ્ત્ય વાક્યં સુતીક્ષ્ણં પ્રતિ-
અભિરામેતિ યન્નામ કીર્તિતં વિવશૈશ્ચ યૈઃ ।
તેપિ ધ્વસ્તાખિલાઘૌઘા યાન્તિ વિષ્ણોઃ પરમ્પદમ્ ॥ ૨૩॥

શ્રીરામેતિ પરં મન્ત્રં તદેવ પરમં પદમ્ ।
તદેવતારકં વિદ્ધિ જન્મ મૃત્યુ ભયાપહ ॥ ૨૪॥

શ્રીરામેતિ વદન્બ્રહ્મ ભાવમાપ્નોત્ય સંશયમ્ ।

તત્વવિદ્યાર્થિનો નિત્યં રમન્તે ચિત્સુખાત્મનિ ॥ ૨૫॥

ઇતિ રામપદેનાસૌ પરબ્રહ્માભિધીયતે ॥ ૨૬॥

અથર્વવેદે શ્રીરામતાપનીયોપનિષદ-
રમન્તે યોગિનોનન્તે સત્યાનન્દે ચિદાત્મનિ ।
ઇતિરામ પદે નાસૌ પરબ્રહ્માભિધીયતે ॥ ૨૭॥

બ્રહ્માણ્ડપુરાણ ઉત્તરખણ્ડે વર્ણિત અધ્યાત્મરામાયણે વસિષ્ઠ વાક્યં શ્રીદશરથં પ્રતિ-
યસ્મિન્ રમન્તે મુનયો વિદ્યયા જ્ઞાન વિપ્લવે ।
તં ગુરુઃ પ્રાહ રામેતિ રમણાદ્રામ ઇત્યપિ ॥ ૨૮॥

મહાશમ્ભુસંહિતાયાં શ્રીરામચન્દ્રં પ્રતિ શ્રીજાનકી વાક્યમ્-
પ્રણવં કેચિદાહુર્વૈ બીજં શ્રેષ્ઠં તથા પરે ।
તત્તુ તે નામ વર્ણાભ્યાં સિદ્ધિમાપ્નોતિ મે મતમ્ ॥ ૨૯॥

રામેતિ નામમાત્રસ્ય પ્રભાવમતિદુર્ગમમ્ ।
મૃગયન્તિ તુ તદ્વેદાઃ કુતો મન્ત્રસ્ય તે પ્રભો ॥ ૩૦॥

શ્રીમન્મહારામાયણે શિવ વાક્યં પાર્વતીં પ્રતિ-
અંશાંશૈ રામનામ્નશ્ચ ત્રયઃ સિદ્ધા ભવન્તિ હિ ।
બીજમોઙ્કારસોઽહં ચ સૂત્રમુક્તમિતિ શ્રુતિઃ ॥ ૩૧॥

પરમેશ્વરનામાનિ સન્ત્યનેકાનિ પાર્વતિ ।
પરન્તુ રામનામેદં સર્વેષામુત્તમોત્તમમ્ ॥ ૩૨॥

રામસ્યૈવરમુક્તીઙ્ગા નામ્નોનાન્યસ્ય જાયતે ।
જીવોત એવ રામસ્ય સ્મરણેનગતિં વ્રજેત્ ॥ ૩૩॥

વૃહત્મનુસ્મૃતૌ ઉત્તરાર્ધે-
સપ્તકોટિમહામન્ત્રાશ્ચિત્તવિભ્રમકારકાઃ ।
એક એવ પરો મન્ત્રઃ રામેત્યક્ષરદ્વયમ્ ॥ ૩૪॥

યન્નામ સંસર્ગ વશાદ્દ્વિવર્ણો નષ્ટ સ્વરૌ મૂનર્દ્ધિ ગતૌ સ્વારાણામ્ ।
તદ્રામ પાદૌ હૃદિ સન્નિધાય દેહિ કથં નોદ્ધ્ર્વ ગતિં પ્રયાતિ ॥ ૩૫॥

પદ્મમહાપુરાણે શિવ વાક્યં પાર્વતીં પ્રતિ-
રામ રામેતિ રામેતિ રમે રામે મનોરમે ।
સહસ્રનામ તત્તુલ્યં રામનામ વરાનને ॥ ૩૬॥

શ્રીવાલ્મીકીય રામાયણે રામાભિરામીય ટીકાયાં બ્રહ્મસંહિતા (એવં શ્રીરામકર્ણામૃતં શ્લોક ૯૪)-
રામેતિ વર્ણદ્વયમાદરેણ સદા સ્મરન્મુક્તિમુપૈતિ જન્તુઃ ।
કલૌ યુગે કલ્મષમાનસાનામન્યત્ર ધર્મે ખલુનાધિકારઃ ॥ ૩૭॥

બૃહદ્ધર્મપુરાણ વેદવ્યાસ વચનં-
નામ્નોસ્તિ યાવતી શક્તિઃ પાપનિર્હરણે હરેઃ ।
તાવત્કર્તું ન શક્નોતિ પાતકં પાતકી જનઃ ॥ ૩૮॥

અથર્વણશ્રુતિ-
યશ્ચાણ્ડાલોઽપિ રામેતિ વાચં વદેત્ તેન સહ ।
સંવદેત્ તેન સહ સંવસેત્ તેન સહ સમ્ભુઞ્જીયાત્ ॥ ૩૯॥

શ્રીમન્નરામચરિતમાનસે આરણ્યકાણ્ડે નારદ વાક્યં શ્રીરામં પ્રતિ-
રાકા રજની ભગતિ તવ રામ નામ સોઇ સોમ ।
અપર નામ ઉડગન બિમલ બસહુઁ ભગત ઉર બ્યોમ ॥ ૪૦॥

ઇતિ શ્રીરામનવરત્નસારસઙ્ગ્રહે શ્રીરામનામસૂક્ષ્મવર્ણનં નામ પ્રથમં રત્નમ્ ॥ ૧॥

## અધ્યાય ૨

નારદપાઞ્ચરાત્રે સુદર્શનસંહિતાયામ્-
રાઘવસ્ય ગુણો દિવ્યો મહાવિષ્ણુઃ સ્વરૂપવાન્ ।
વાસુદેવો ઘનીભૂતસ્તનુતેજઃ સદાશિવઃ ॥ ૧॥

મત્સ્યશ્ચ રામહૃદયં તપો ગુરુજનાર્દનઃ ।
કૂર્મશ્ચાધારશક્તિશ્ચ વારાહો ભુજયોર્બલમ્ ॥ ૨॥

નરસિંહો મહાકોપો વામનઃ કટિમેખલા ।
ભાર્ગવો જઙ્ઘયો જાતો બલરામશ્ચ પૃષ્ઠતઃ ॥ ૩॥

બૌદ્ધશ્ચ કરુણા સાક્ષાત્ કલ્કિઃ ચિત્તસ્ય હર્ષતઃ ।
કૃષ્ણઃ શૃઙ્ગારરૂપશ્ચ વૃન્દાવનવિભૂષણઃ ।
એતાંશ્ચાંશં કલાશ્ચૈવ રામસ્તુ ભગવાન્ સ્વયમ્ ॥ ૪॥

નારદપાઞ્ચરાત્રે ભરદ્વાજસંહિતાયામ્-
અવતારા બહવઃ સન્તિ કસ્યાશ્ચાંશ વિભૂતયઃ ।
રામ એવ પરં બ્રહ્મ સચ્ચિદાનન્દમવ્યયમ્ ॥ ૫॥

સર્વેષામવતારાણામવતારી રઘૂત્તમઃ ।
સરિતાં સર્વ મધ્યેતુ સરયૂ પાવની યથા ॥ ૬॥

નારદપાઞ્ચરાત્રે હનુમત્સંહિતાયાં હનુમદ્વાક્યં મહર્ષિ અગસ્ત્યં પ્રતિ-
તુરીયા જાનકી પ્રોક્તા તુરીયો રઘુનન્દનઃ ।
ઉભયોરંશજા સર્વે ચાવતારાહ્યસઙ્ખ્યકાઃ ॥ ૭॥

સર્વેષામવતારાણામવતારી રઘૂત્તમઃ ।
શ્રુતં દૃષ્ટં મયા સર્વં ચિરાયજીવાનન્મુને ॥ ૮॥

નારદપાઞ્ચરાત્રે સનકસનાતન સંહિતાયાં (એવં રામાર્ચનચન્દ્રિકાયામ્)-
ચૈત્રે માસિ નવમ્યાં તુ શુક્લપક્ષે રઘૂત્તમઃ ।
પ્રાદુરાસીત્ પુરા બ્રહ્મન્ પરબ્રહ્મૈવ કેવલમ્ ॥ ૯॥

અગસ્ત્યસંહિતાયાં અગસ્ત્ય વાક્યં સુતીક્ષ્ણં પ્રતિ-
યથાહ્યાદિપ્રદીપેન સર્વદીપપ્રબોધનમ્ ।
તથા સર્વાવતારાણામવતારી રઘૂત્તમઃ ॥ ૧૦॥

યથા સર્વાવતારાણામવતારી રઘૂત્તમઃ ।
તથા સર્વેષુ તીર્થેષુ પાવની સરયૂ સરિત્ ॥ ૧૧॥

યાવન્ન જાયતે તસ્યાઃ સ્નાનપાનનિષેવણમ્ ।
તાવન્ન જાનકીનાથે પ્રાપ્યતે ભક્તિરુત્તમા ॥ ૧૨॥

અયોધ્યા ચ પરં બ્રહ્મ સરયૂ સગુણઃ પુમાન્ ।
તન્નિવાસી જગન્નાથઃ સત્યં સત્યં વદામ્યહમ્ ॥ ૧૩॥

સદાશિવસંહિતાયાં સૌમિત્રિ વાક્યં વેદાન્પ્રતિ-
સર્વસૌભાગ્યનિલયં સર્વાનન્દૈકનાયકમ્ ।
કૌશલ્યાનન્દનં રામં કેવલં ભવખણ્ડનમ્ ॥ ૧૪॥

વિશ્વાવસુચિત્રકેતુચિત્રસેનાદ્યુલૂકકૈઃ ।
તુમ્બુરૈર્નરદાદ્યૈશ્ચ શુકપિકસુકણ્ઠકૈઃ ॥ ૧૫॥

ગીયમાનં પરં તત્ત્વં શ્રુતિજાતિવિશારદૈઃ ।
અનન્તાંશસમુદ્ભૂતં મુનિનાક્ષરરૂપિણા ॥ ૧૬॥

સઙ્ગીયમાનં વિનયાદ્ વાલ્મીકિનાન્તરાત્મના ।
મત્સ્યકૂર્મવરાહૈશ્ચ નૃસિંહહરિવામનૈઃ ॥ ૧૭॥

ભાર્ગવહલિકંસારિબુદ્ધકલ્કિભિરુદ્યતૈઃ ।
ઉપાસ્યમાનં દેવેશં દેવાનાં પ્રવરં વિભુમ્ ॥ ૧૮॥

તત્ર વાગીશ્વરી દેવી માધવી પ્રિયવલ્લભા ।
અસિતા ચ સિતા ચૈવ પ્રકૃતિર્ગુણસમ્ભવા ॥ ૧૯॥

ઉમાદેવી મહામાયા શ્રુતિજાતિવિશારદા ।
પદ્મહસ્તા વિશાલાક્ષી કમલા હરિવલ્લભા ॥ ૨૦॥

સુરભી પ્રેમદા નિત્યા વૃન્દાદેવી મનોરમા ।
ચિદાત્મકં સદાભાસં નયનાનન્દદાયકમ્ ॥ ૨૧॥

સ્વકાન્તં હૃદયારામં રામં રાજીવલોચનમ્ ।
નિર્વિકારં પૃથુશ્રોણ્યો રાઘવં પર્યુપાસતે ॥ ૨૨॥

ઉર્વશી મેનકા રમ્ભા રાધા ચન્દ્રાવલી તથા ।
હેમા ક્ષેમાવરારોહા પદ્મગન્ધાઃ સુલોચનાઃ ॥ ૨૩॥

હંસિની માલિની પદ્મા હરિણી મૃગલોચનાઃ ।
રામસ્ય પરિનૃત્યન્તિ ગીતવાદિત્રમોહિતાઃ ॥ ૨૪॥

કર્પૂરાઙ્ગી વિશાલાક્ષી શક્તિપ્રિયારસોત્સવા ।
ચારુનેત્રા ચારુગાત્રા ચાર્વઙ્ગી ચારુલોચના ॥ ૨૫॥

ગોપકન્યાસહસ્રૈસ્તુ ગોપવાલૈશ્ચ તાદૃશૈઃ ।
ગોકુલૈરાવૃતં સમ્યક્ પદ્મશઙ્ખાદિભિઃ સદા ॥ ૨૬॥

અઙ્ગાદિપરિસઙ્કીર્ણં આત્માદિશક્તિરઞ્જિતમ્ ।
વેષ્ટિતં વાસુદેવાદ્યૈઃ સેવિતં હનુમદાદિભિઃ ॥ ૨૭॥

મહાસુન્દરીતન્ત્રે શ્રીજાનકી વાક્યં જનકં પ્રતિ-
મત્તો નારાયણો વિષ્ણુરાત્માનં કતિધા સૃજત્ ।
તેષુ તાત વિશિષ્ટા યે અવતારાઃ હરેર્દશ ॥ ૨૮॥

દ્વયં વનચરં જ્ઞેયં દ્વયં જલચરં તથા ।
ક્ષોણિપાશ્ચ ત્રયો જ્ઞેયા વિપ્રવંશોદ્ભવાસ્ત્રયઃ ॥ ૨૯॥

મ્લેચ્છાદીનાં નિહન્તારો હરેરંશાઃ ક્રમાદ્દશ ।
સાત્ત્વિકીં રાજસીમુગ્રાન્તામસીં યોનિમાશ્રિતાઃ ॥ ૩૦॥

એતે તુ પ્રભવઃ શૌર્યવીર્યશક્તિસમન્વિતાઃ ।

સૃષ્ટિસ્થિતિલયાનાં ચ કર્તારઃ પ્રથિતાઃ કિલ ॥ ૩૧॥

એતેભ્યઃ પરતો નિત્યઃ રામઃ સદસદાત્મકઃ ।
રહસ્યમેતદ્ગુહ્યં તે કથિતં પ્રિયકામ્યયા ॥ ૩૨॥

શ્રીજનક ઉવાચ -
મત્સ્યાદ્યાઃ ઈશ્વરાઃ પ્રોક્તાસ્તેભ્યો રામઃ પરઃ પુમાન્ ।
કથમેતદ્વિજાનામિ તવ પુત્રિ પ્રસાદતઃ ॥ ૩૩॥

જાનકી ઉવાચ-
વિષ્ણોરદ્ભુત વીર્યસ્ય મત્સ્ય કૂર્મ કુલાદિષુ ।
અંશાવતારાસ્તે સર્વે વિના રામં રઘૂદ્વહમ્ ॥ ૩૪॥

મચ્છક્ત્યાપ્રતિરુદ્ધાનાં મત્સ્યાદીનાંહિ પાર્થિવ ।
જન્મ કાર્યન્તરપ્રાપ્તિ સ્વરૂપં તેષુ જાયતે ॥ ૩૫॥

સારભો યોગિની નક્રઃ નર્યો વ્યાધસ્તથા બલઃ ।
કાલઃ કલયતાં તેષાં તનભુક્ પ્રભુરવ્યયઃ ॥ ૩૬॥

રામઃ કાલાત્મકઃ શ્રીમાન્ સર્વ ભૂત શરીર ભુક્ ।
ઇતિ વિજ્ઞાપિતં તાત યથાયોગ્યં તથા કુરુ ॥ ૩૭॥

બ્રહ્મણસ્તુતિર્દેવ દેવાનામભયોહ્યપિ ।
ન જીવકર્મ વૈષમ્યં નિમિત્તં તાત બુદ્ધ્યતે ॥ ૩૮॥

રાઘવસ્યાપ્રમેયસ્ય દૃષ્ટા દૃષ્ટં વિજાનતઃ ।
ગતિં પ્રદ નરેન્દ્રસ્ય સુપ્રકાશસ્ય ધીમતઃ ॥ ૩૯॥

અહન્તુ વશગાયસ્ય જગદાનન્દ કારિણી ।
પાલયામિસૃજામ્યદ્ય સર્વ ભૂતાનિ હન્મિચ ॥ ૪૦॥

લીલયા મે જગત્સર્વં મનુગ્રહાય હરસ્ય ચ ।
અન્તાય રક્ષસાં તાત સોવતીર્ણઃ સ્વયં વિભુઃ ॥ ૪૧॥

શ્રીજનક ઉવાચ-
પૂર્વમુક્તા ત્વયાદેવિવિભૂતિર્દિવ્ય રૂપિણી ।
જ્ઞાતં જ્ઞેયં મયાચિસ્યાત્ પ્રસાદાત્તવ સુવ્રતે ॥ ૪૨॥

શ્રીજાનકી ઉવાચ-
મહાશમ્ભુર્મહાવિષ્ણુર્મહામાયા જલેશયા ।

મહાનહં કૃતિર્વિશ્વં કારણાનિ ચ સર્વશઃ ॥ ૪૩॥

ગુણત્રયં ચ પ્રકૃતિઃ સૂર્યેન્દુ હવ્ય વાહનાઃ ।
બ્રહ્માવિષ્ણુશ્ચ રુદ્રશ્ચ દેવેન્દ્રા ઋષયસ્તથા ॥ ૪૪॥

સ્થાવરાં જઙ્ગમાશ્ચૈવ યે ચાન્યેભૂત ભાવનાઃ ।
એતાવત્ કલાયોગિન્ મમ રામઃ સ્વયંહરિઃ ॥ ૪૫॥

હરેરંશાવતારાણાં કૃત્યમેતત્ સુનિશ્ચિતમ્ ।
ન પ્રવૃત્તિ નિવૃત્યત્વં પદ્મ પત્ર મિવામ્ભસા ॥ ૪૬॥

મહાશમ્ભુ સંહિતાયાં અગસ્ત્ય વાક્યં સુતીક્ષ્ણં પ્રતિ-
શ્રીરામસ્ય કલાંશાદ્વૈ અવતારા ભવન્તિહિ ।
કોટિકોટિશ્ચ કાર્ય્યાર્થે સિન્ધૌ વિચીવ વૈ મુને ॥ ૪૭॥

સીતા કલાંશાત્સખ્યશ્ચ શક્તયઃ સમ્ભવન્તિતાઃ ।
યાસાં કલાકલાંશેન જાતા નાર્ય્યશ્ચશ્ચ્યાદયઃ ॥ ૪૮॥

શ્રીરામ મન્ત્રસ્યાંશાશ્ચ મન્ત્રાશ્ચાન્યે ભવન્તિહિ ।

સનત્કુમાર સંહિતાયાં વેદ વ્યાસ વાક્યં યુધિષ્ઠિરં પ્રતિ-
વિજ્ઞાનહેતું વિમલાયતાક્ષં પ્રજ્ઞાનરૂપં સ્વસુખૈકહેતુમ્ ।
શ્રીરામચન્દ્રં હરિમાદિદેવં પરાત્પરં રામમહં ભજામિ ॥ ૫૦॥

પરાત્પરતરં તત્ત્વં સત્યાનન્દં ચિદાત્મકમ્ ।
મનસા શિરસા નિત્યં પ્રણમામિ રઘૂત્તમમ્ ॥ ૫૧॥

અશેષવેદાત્મકમાદિસંજ્ઞમજં હરિં વિષ્ણુમનન્તમાદ્યમ્ ।
અપારસંવિત્સુખમેકરૂપં પરાત્પરં રામમહં ભજામિ ॥ ૫૨॥

રામં સત્યં પરં બ્રહ્મ રામાત્કિઞ્ચિન્ન વિદ્યતે ।
તસ્માદ્રામસ્વરૂપં હિ સત્યં સત્યમિદં જગત્ ॥ ૫૩॥

નારદપાઞ્ચરાત્ર બ્રહ્મસંહિયાયામ્-
પૂર્ણઃ પૂર્ણાવતારશ્ચ શ્યામો રામો રઘૂદ્વહઃ ।
અંશા નૃસિંહ કૃષ્ણાદ્યા રાઘવો ભગવાન્સ્વયમ્ ॥ ૫૪॥

શ્રીમદ્ આદિરામાયણે બ્રહ્મણો વાક્યં નારદં પ્રતિ-
હર્ષિતા રાધિકા તત્ર જાનક્યંશ સમુદ્ભવા ।
રામસ્યાંશ સમુદ્ભૂતઃ કૃષ્ણો ભવતિ દ્વાપરે ॥ ૫૫॥

શ્રીમન્નરામચરિતમાનસે મનુવાક્યમ્-
સમ્ભુ બિરઞ્ચિ બિષ્નુ ભગવાના ।
ઉપજહિં જાસુ અંસ તેં નાના ॥

સુનુ સેવક સુરતરુ સુરધેનૂ ।
બિધિ હરિ હર બન્દિત પદ રેનૂ ॥

જાસુ અંસ ઉપજહિં ગુનખાની ।
અગનિત ઉમા રમા બ્રહ્માની ॥

ભૃકુટિ બિલાસ જાસુ જગ હોઈ ।
રામ બામ દિસિ સીતા સોઈ ॥

તત્રૈવ કુમ્ભકરણ વાક્યં રાવણં પ્રતિ-
કીન્હેહુ પ્રભુ બિરોધ તેહિ દેવક ।
સિવ બિરઞ્ચિ હરિ જાકે સેવક ॥ ૫૬॥

ઇતિ શ્રીરામનવરત્નસારસઙ્ગ્રહે શ્રીરામરૂપગુણ-પ્રતાપ સૂક્ષ્મવર્ણનં નામ દ્વિતીય રત્નમ્ ॥ ૨॥

## અધ્યાય ૩

સોરઠા
સબ બૈકુણ્ઠ સચેત, ગોપુર બિચ સાકેત સુભ ।
તાકે પર સાકેત ઉભય અવધ સાન્તઃપુરી ॥ ૧॥

સદાશિવસંહિતાયાં સૌમિત્રિ વાક્યં શ્રુતિપ્રતિ-
મહર્લોકઃ ક્ષિતેરૂર્ધ્વમેક કોટિ પ્રમાણતઃ ।
કોટિ દ્વયેન વિખ્યાતો જનલોકો વ્યવસ્થિતઃ ॥ ૨॥

ચતુષ્કોટિ પ્રમાણસ્તુ તપો લોકો વિરાજતે ।
ઉપરિષ્ઠાત્તતઃ સત્યમષ્ટ કાટિ પ્રમાણતઃ ॥ ૩॥

અતઃ પ્રખ્યાતકૌમારઃ કોટિ ષોડ઼શ સમ્ભવઃ ।
તદૂર્ધ્વોપરિ સઙ્ખ્યાત ઉમાલોકઃ સુનિષ્ઠિતઃ ॥ ૪॥

શિવલોકસ્તદૂર્ધ્વન્તુ પ્રકૃત્યા ચ સમાગતઃ ।
વિશ્વસ્ય પુરતોવૃત્તિઃ શિવસ્ય પુરતોવહિઃ ॥ ૫॥

એતસ્માદ્વહિરાવૃત્તિઃ સપ્તાવરણ સંજ્ઞકઃ ।

સદાશિવસંહિતાયાં અન્યચ્ચ-
તદૂર્ધ્વં કોટિ પઞ્ચાશત્ ક્રમાદ્દશ ગુણાત્પરમ્ ॥ ૬॥

ભૂમિરાપોનલો વાયુઃ ખમહં ચ ત્રિધાપરમ્ ।
પ્રકૃતેર્મહાઞ્શ્ચ મૂલેન સપ્તાવરણ સંજ્ઞકાઃ ॥ ૭॥

સદાશિવસંહિતાયાં ચ-
તદૂર્ધ્વં સર્વ સત્ત્વાનાં કાર્ય કારણ માનિનામ્ ।
નિલયં પરમં દિવ્યં મહાવૈષ્ણવ સંજ્ઞકમ્ ॥ ૮॥

સહસ્રમૂર્દ્ધા વિશ્વાત્મા સહસ્રાક્ષઃ સહસ્રપાત્ ।
યન્નિમેષા જગત્સર્વં લયીભૂતં વ્યવસ્થિતમ્ ॥ ૯॥

ઉદ્ભવન્તિ વિનશ્યન્તિ કાલજ્ઞાન વિડમ્વનૈઃ ।
યદંશેન સમુદ્ભૂતા બ્રહ્મ વિષ્ણુ મહેશ્વરાઃ ॥ ૧૦॥

એતદ્ગુહ્યં સમાસ્થાનં દદાતુ વાઞ્છિતહિનઃ ।
તદૂર્ધ્વન્તુ પરન્દિવ્યં સત્ય મન્યદ્વિવસ્થિતમ્ ॥ ૧૧॥

ન્યાસિનાં યોગિનાં સ્થાનં ભગવદ્ભાવનાત્મનામ્ ।
મહાશમ્ભુર્મોદતેત્ર સર્વ શક્તિ સમન્વિતઃ ॥ ૧૨॥

તદૂર્ધ્વં તુ પરઙ્કાન્તં મહા વૈકુણ્ઠ સંજ્ઞકમ્ ।
વાસુદેવાદયસ્તત્ર વિહરન્તિ સ્વમાયયા ॥ ૧૩॥

તદૂર્ધ્વન્તુ સ્વયમ્ભાતિ ગોલોકઃ પ્રકૃતે પરઃ ।
વાઙ્મનોગોચરાતીતો જ્યોતિરૂપઃ સનાતનઃ ॥ ૧૪॥

તસ્યમધ્યે પુરં દિવ્યમ સાકેતમિતિ સંજ્ઞકમ્ ।
યોષિદ્રત્ન મણિસ્તમ્ભ પ્રાસાદગણ સેવિતમ્ ॥ ૧૫॥

તન્મધ્યે પરમોદારઃ કલ્પવૃક્ષો વરપ્રદઃ ।
તસ્યાધઃ પરમન્દિવ્યં રત્નમણ્ડપ મુત્તમમ્ ॥ ૧૬॥

તન્મધ્યે વેદિકારમ્યા સ્વર્ણરત્ન વિનિર્મિતા ।
તન્મધ્યે ચ પરં શુભ્રં રત્નં સિંહાસનં શુભમ્ ॥ ૧૭॥

સહસ્રારં મહાપદ્મં કર્ણિકાયુક્તમુત્તમમ્ ।
તન્મધ્યે મુદ્રિકાભિન્ન મુદ્રાદ્વાભ્યાંવિભિન્નકમ્ .. .. ૧૮॥

વહ્નીન્દુમણ્ડલે ચાપિ વેષ્ટિતં વિન્દુ ભૂષિતમ્ ।

ચન્દ્રકોટિ પ્રતીકાશં છત્રકં ચ સચામરમ્ ॥ ૧૯॥

સદામૃત ઘનશ્રાવિ મુક્તાદામ વિતાનકમ્ ।
તન્મધ્યે જાનકી દેવી સર્વશક્તિ નમસ્કૃતા ॥ ૨૦॥

તત્રાસ્તે ભગવાન્ રામઃ સર્વદેવશિરોમણિઃ ।
તત્રાદૌ ચિન્તયેત્તેજો વહ્નિરૂપં સુશક્તિકમ્ ॥ ૨૧॥

તેજસામહાતાશ્લિષ્ટ માનન્દૈકાગ્રમન્દિરમ્ ।
એકાગ્રમનસા પશ્યેત્તત્રદેવં સુવિગ્રહમ્ ॥ ૨૨॥

સ્નિગ્ધ મિન્દીવરશ્યામં કોટીન્દુ લલિત દ્યુતિમ્ ।
ચિદ્રૂપં પરમોદારં વીરભદ્રં રઘૂદ્વહમ્ ॥ ૨૩॥

દ્વિભુજં મધુરંશાન્તં જાનકી પ્રેમ વિહ્વલમ્ ।
દોર્દણ્ડચણ્ડકોદણ્ડં શરચ્ચન્દ્રં મહાભુજમ્ ॥ ૨૪॥

સીતાલિઙ્ગિતબામાઙ્ગં કામરૂપં રસોત્સુકમ્ ।
તરુણારુણ સઙ્કાશં વિકચામ્ભુજ પાદકમ્ ॥ ૨૫॥

નખચન્દ્રં પદદ્વન્દ્વં પ્રિય તેજઃ સમાવૃતમ્ ।
કૂર્મપૃષ્ઠ પદાભાસં રણન્મઞ્જીર પાદકમ્ ॥ ૨૬॥

કટિસૂત્રાઙ્કિતં શ્રીશં યજ્ઞ સૂત્રૈ રલઙ્કૃતમ્ ।
રત્નકઙ્કણ કેયૂર શોભિતાય ભુજ દ્વયમ્ ॥ ૨૭॥

ચન્દ્રકોટિ પ્રતીકાશ કૌસ્તુભેન વિરાજિતમ્ ।
દિવ્યરત્ન સમાયુક્ત મુદ્રિકાભિરલં કૃતમ્ ॥ ૨૮॥

નાસિકાંશક ભાગે ન મુક્તાફલ સ્ફુરન્મુખમ્ ।
સૂર્યકોટિપ્રતીકાશ કુણ્ડલાઢ્ય શ્રુતિદ્વયમ્ ॥ ૨૯॥

પ્રવૃત્તારુણ સઙ્કાશ કિરીટેન વિરાજિતમ્ ।
ગોવિન્દં ગોવિદાં શ્રેષ્ઠં ચિન્મયાનન્દ વિગ્રહમ્ ॥ ૩૦॥

દિવ્યાયુધ સુસમ્પન્નં દિવ્યાભરણભૂષિતમ્ ।
અક્ષરં કેવલં બ્રહ્મ પીતકૌશેય વાસસમ્ ॥ ૩૧॥

શઙ્ખ ચક્ર ગદાપદ્મ ચર્માસિ હલ મૂસલૈઃ ।
તદ્રૂપૈર્વિવિધાકારૈઃ સેવ્યમાનં પરાત્પરમ્ ॥ ૩૨॥

વસિષ્ઠવામદેવાદિ મુનિભિઃ પરિસેવિતમ્ ।
લક્ષ્મણં પશ્ચિમે ભાગે ધૃત છત્રં સ ચામરમ્ ॥ ૩૩ ॥

ઉભૌ ભરત શત્રુઘ્નૌ તાલ વૃન્ત કરામ્બુજૌ ।
અગ્રેઽવ્યગ્રં હનુમન્તં વાચયન્તં સુપુસ્તકમ્ ॥ ૩૪ ॥

ભાનુ કોટિ પ્રતીકાશં ચન્દ્રકોટિ પ્રમોદકમ્ ।
ઇન્દ્ર કોટિ સદા મોદં વસુ કોટિ વસુપ્રદમ્ ॥ ૩૫ ॥

વિષ્ણુકોટિ પ્રતીપાલં બ્રહ્મકોટિ વિસર્જનમ્ ।
રુદ્ર કોટિ પ્રમન્દ વૈ માતૃ કોટિ વિનાશનમ્ ॥ ૩૬ ॥

કોટિ ભૈરવ સંહારં મૃત્યુ કોટિ વિભક્ષકમ્ ।
યમકોટિ દુરાધર્ષં કાલ કોટિ પ્રધાવકમ્ ॥ ૩૭ ॥

ગન્ધર્વ કોટિ સઙ્ગીતં ગણ કોટિ ગણેશ્વરમ્ ।
કામકોટિ કલાનાથં દુર્ગાકોટિ વિમોહનમ્ ॥ ૩૮ ॥

સર્વ સૌભાગ્ય નિલયં સર્વાનન્દૈક દાયકમ્ ।
કૌશલ્યાનન્દનં રામં કેવલં ભવ ખણ્ડનમ્ ॥ ૩૯ ॥

સદાશિવસંહિતાયાં સૌમિત્રિ વાક્યં વેદાન્પ્રતિ-
સગુણં નિર્ગુણં ચૈવ પરમાત્મા તથૈવ ચ ।
એતેચાંશાહિ રામસ્ય પૂર્વે ચાન્તે ચ મધ્યતઃ ॥ ૪૦ ॥

આદિ જ્યોતિર્મહાશમ્ભુરાત્મા પૂર્ણેન ચાક્ષરમ્ ।
તત્પરો વાસુદેવઃ સ્યાત્ સ્વયં બ્રહ્મ નિરક્ષરમ્ ॥ ૪૧ ॥

રાઘવસ્ય ગુણોદિવ્યો મહાવિષ્ણુઃ સ્વરૂપવાન્ ।
વાસુદેવો ઘનીભૂતસ્તનુ તેજો મહાશિવઃ ॥ ૪૨ ॥

અન્યચ્ચ સૌમિત્રિ વાક્યં-
બ્રહ્મૈવાત્મામનશ્ચૈવ દેહશ્ચ પ્રકૃતિસ્તથા ।
ઘનીભૂતં હરેસ્તેજો બ્રહ્મેતિ પરિ કથ્યતે ॥ ૪૩ ॥

મહાસુન્દરી તન્ત્રે દ્વિતીયાધ્યાયે-
સૃષ્ટિરગ્રે પરે ધામ્નિ સંવાદઃ સમભૂત કિલ ।
મહાશમ્ભુર્મહાવિષ્ણુર્મહામાયેરિતા પુનઃ ॥ ૪૪ ॥

મહાશમ્ભુર્મહામાયા મહાવિષ્ણુશ્ચ સક્રિયઃ ।

કાલેન સમનુપ્રાપ્ત રાઘવમ્પરિ ચિન્તયન્ ॥ ૪૫॥

તત્રૈવ મહાશમ્ભુ વાક્યં મહાવિષ્ણું પ્રતિ-
શૃણુ તાત પ્રવક્ષ્યામિ રામાદદ્ભુત કર્મણઃ ।
અખણ્ડ બ્રહ્મણો નિત્યાદ્રાઘવાન્નિત્યવિગ્રહાત્ ॥ ૪૬॥

ચિદાનન્દાત્પરાનન્દાત્સાકેત નગરાધિપાત્ ।
સીતાયાઃ પરદેવ્યાશ્ચલીલામાત્રમિદં જગત્ ॥ ૪૭॥

ઇન્દ્રનીલ મણિ સ્નિગ્ધોરુચિરાકૃતિરવ્યયઃ ।
દ્વિભુજાવયવોદક્ષઃ શરકોદણ્ડ મણ્ડિતઃ ॥ ૪૮॥

ઇતિરામસ્તુ વિગ્રહવાન્ પરં બ્રહ્માભિધીયતે ।
ભુક્તિ મુક્તિ પ્રસાદાર્થં સાધકાનાં પુનઃ પુનઃ ॥ ૪૯॥

એવં જ્ઞેયા પરાનિત્યા સીતા બ્રહ્મ સુવિગ્રહા ।
સર્વ શક્તિમયી ધાત્રી સર્વશક્તિ પરા તથા ॥ ૫૦॥

અનેકાવયવૈર્ભિન્ના નિત્ય લીલા સુવિગ્રહા ।
અનુગ્રહાર્થ મસ્માકમેકં બ્રહ્મ દ્વિધાગતમ્ ॥ ૫૧॥

રામઃ સીતા જાનકી રામચન્દ્રો નાહુર્ભેદંહ્યેતયોરસ્તિકશ્ચિત્ ।
સન્તોમત્વા તત્વમેતદ્વિબુધ્વાપારં યાતાઃ સંસૃતેર્મૃત્યુકાલાત્ ॥ ૫૨॥

બ્રહ્માણ્ડાનામસઙ્ખ્યાનાં બ્રહ્મ વિષ્ણુ હરાત્મનામ્ ।
ઉદ્ભવે પ્રલયે હેતુઃ રામ એવ ઇતિ શ્રુતિઃ ॥ ૫૩॥

સૃષ્ટિસ્થિત્યન્ત કરણે બ્રહ્મ વિષ્ણુ મહેશ્વરઃ ।
યસ્યાયુતાયુતાંશાંશાસ્ તદબ્રહ્મેત્યભિધીયતે ॥ ૫૪॥

સહસ્ર-કોટયઃ સન્તિ બ્રહ્મણ્ડાસ્તિર્યગૂર્ધ્વગા ।
બ્રહ્માણો હરયો રુદ્રાસ્તત્ર તત્ર વ્યવસ્થિતાઃ ॥ ૫૫॥

અજાદિ દેવ દેવસ્ય શ્રીરામસ્ય મહાત્મનઃ ।
અવતારા બહવઃ સન્તિ કલાશ્ચાંશ વિભૂતયઃ ॥ ૫૬॥

અવતારૈરસઙ્ખ્યાતૈઃ પ્રધાનૈરભિતસ્તથા
સેવ્યમાનઃ પરે રમ્યે ગુણાવાસે પરં પદે ॥ ૫૭॥

મહાસુન્દરીતન્ત્રે શ્રીજનકૌવાચ-
કસ્મિન્પીઠે મહાદેવી નિત્યં રામઃ પ્રતિષ્ઠિતઃ ।

પૂર્ણાનન્દો ઘનશ્યામો માયા ગુણ વિડમ્બકઃ ॥ ૫૮॥

તત્રૈવ શ્રીજાનકીઉવાચ-
ગોલોક સંજ્ઞકે નિત્યસાકેત ભવનોત્તમે ।
ભ્રાતૃભિરનુજૈર્ભાતિ દેવ દેવઃ સનાતનઃ ॥ ૫૬॥

સ્વપ્રકાશતે નિત્યરૂપો રામો માયા દયાત્મવાન્ ।
ઇન્દ્રનીલમણિ સ્નિગ્ધઃ શ્યામસુન્દર વિગ્રહઃ ॥ ૬૦॥

ભાર્ગવપુરાણે નારાયણ વાક્યે નરં પ્રતિ-
ઇમમેવ પુરા પ્રશ્નં વૈકુણ્ઠનગરે હરિમ્ ।
સર્વેશ્વરી જગન્માતા પપ્રચ્છ કમલાલયા ॥ ૬૧॥ ।

ત્રિપાદ્વિભૂતૌ વૈકુણ્ઠે વિરજાયાઃ પરે તટે ।
યા દેવાનાં પૂરયોધ્યા હ્યમૃતેનાવૃતા પુરી ॥ ૬૨॥

શ્રીમન્મહારામાયણે શઙ્કર વાક્યં પાર્વતીં પ્રતિ-
ગોલોકાચ્ચ પરં જ્ઞેયં સાકેતાન્તઃ પુરં પ્રિયે ।
ગોપ્યાદ્ગોપ્ય તરાગોપ્યાસાયોધ્યાતીવ દુર્લભા ॥ ૬૩॥

પુંસામગોચરં સ્થાનં સખાદાસ વિવર્જિતમ્ ।
મહાપુરુષ રૂપેણ શ્રીરામોહિ વિરાજિતે ॥ ૬૪॥

અનન્તાભિઃ સખીભિશ્ચ સાર્દ્ધંરામઃ સ સીતયા
સ્વેચ્છયા કુરુતેરાસં તાઃ કુજાગાત્ર સમ્ભવાઃ ॥ ૬૫॥

સર્વાભરણ સમ્પન્નો રત્નૌઘૈર્વિવિધૈર્વરૈઃ ।
મધ્યોવયઃ કિશોરશ્ચાનન્ત રૂપો રઘૂત્તમઃ ॥ ૬૬॥

કિશોર્યઃ સકલાસખ્યો ભૂષિતાશ્ચન્દ્રિકાદિભિઃ ।
જાનકીરામરૂપાસ્તા મહાહ્લાદાભિ સંયુતાઃ ॥ ૬૭॥

શ ૃણ્ષ્વશુભગેમત્તો વિસ્તરેણ કથામ્પરામ્ ।
રામ રાસ સમાવિષ્ટાં પ્રવક્ષ્યે ત્વદ્ધિતાયવૈ ॥ ૬૮॥

હનુમત્સંહિતાયાં શ્રીહનુદ્વાક્યં અગસ્ત્યં પ્રતિ-
પુંસામગોચરં સ્થાનં કેવલં પ્રેમદાયકમ્ ।
નારી ભાવસંયુક્તા તેષાં દૃશ્યં ભવેદ્ ધ્રુવમ્ ॥ ૬૯॥

ગોલોકસાકેતસમાવુભૌ મુને કદાપિ ભેદો નહિ રાઘવસ્ય ચ ।

ઉભૌ તુ વિશ્રામનિવાસધામ્ની પરસ્પરાવસદૃશે વિલાસતઃ ॥ ૭૦॥

હિરણ્યગર્ભ સંહિતાયાં અગસ્ત્ય વાક્યં સુતીક્ષ્ણં પ્રતિ-
અદ્વૈતાનન્દ ચૈતન્યં શુદ્ધસત્વૈક લક્ષણમ્ ।
વહિરન્તઃ સુતીક્ષ્ણાત્ર રામચન્દ્રઃ પ્રકાશતે ॥ ૭૧॥

શ્રીરામ ગીતાયાં શ્રીરામચન્દ્ર વાક્યં વસિષ્ઠં પ્રતિ-
યથા સર્વેષુ કુમ્ભેષુ રબિરે કોપિદૃશ્યતે ।
તથાસર્વેષુ ભૂતેષુ ચિન્તનીયોસ્મ્યહં સદા ॥ ૭૨॥

કશ્યપસ્મૃતૌ કશ્યપ વાક્યં શ્રીરામં પ્રતિ-
અવતારાશ્ચ યે તાત ત્વત્તઃ સર્વે ભવન્તિ તે ।
ઉદયાદ્રેરિવ પ્રાચ્યા માદિત્યાનાં યુગે યુગે ॥ ૭૩॥

અથર્વવેદ રામરહસ્યોપનિષદ્ ઉત્તરાર્દ્ધે-
યાઽયોધ્યા સા સર્વવૈકુણ્ઠાનામેવ મૂલાધારા પ્રકૃતેઃ પરા તત્સદ્ બ્રહ્મમયી ।
વિરજોત્તરા દિવ્યરત્નકોશાઢ્યા તસ્યા નિત્યમેવ શ્રીસીતારામયોર્વિહારસ્થલમસ્તિ ॥ ૭૪॥

કૃષ્ણ યજુર્વેદીય તૈત્તિરીયારણ્યક
દેવાનાં પૂરયોધ્યા । તસ્યાꣳ હિરણ્મયઃ કોશઃ ।
સ્વર્ગો લોકો જ્યોતિષાઽઽવૃતઃ । યો વૈ તાં બ્રહ્મણો વેદ ।
અમૃતેનાઽઽવૃતાં પુરીમ્ । તસ્મૈ બ્રહ્મ ચ બ્રહ્મા ચ ।
આયુઃ કીર્તિં પ્રજાન્દદુઃ । વિભ્રાજમાનાꣳ હરિણીમ્ ।
યશસા સમ્પરીવૃતામ્ । પુરꣳ હિરણ્મયીં બ્રહ્મા ॥ ૭૫॥

શ્રીમન્નરામચરિતમાનસે શ્રીરામચન્દ્ર વાક્યં-
જદ્યપિ સબ બૈકુણ્ઠ બખાના । વેદ પુરાન બિદિત જગુ જાના ।
અવધપુરી સમ પ્રિય નહિં સોઊ । યહ પ્રસઙ્ગ જાનૈ કોઉ કોઊ ॥ ૭૬॥

ઇતિ શ્રીરામનવરત્નસારસઙ્ગ્રહ પર રૂપ-ધામ સૂક્ષ્મ વર્ણનં તૃતીયં રત્નમ્ ॥ ૩॥

## અધ્યાય ૪

ધનુપ બાન અસિ ચક્ર દર ગદા પદ્મ હલ આદિ ।
ધનુપ બાન બર મોક્ષ પ્રદ આયુધ સકલ અનાદિ ॥ ૧॥

યજુર્વેદે ઉત્તરાર્દ્ધ એકોનત્રિંશત્તમેઽધ્યાયે એકોન ચત્વારિંશત્તમો મન્ત્રઃ-

ધન્વના ગા ધન્વનાજિં જયેમ ધન્વના તીવ્રાઃ સમદો" જયેમ ।
ધનુઃ શત્રોરપકામં કૃણોતિ ધન્વના સર્વાઃ પ્રદિશો" જયેમ ॥ ૨॥

ભાષ્યઃ અસ્ય મન્ત્રસ્યાર્થઃ । ધન્વના, ધનુષાઙ્કિતા ઇતિ શેષઃ । અતસ્તીવ્રાઃ પટવઃ પરબ્રહ્મપ્રાપ્તિપ્રતિબન્ધકીભૂતપાપનિરસને સમર્થાવયં સમદઃ કામાદિભિરનુષ્ઠિતાન્ સઙ્ગ્રામાન્ જયેમ ।
નન્વિન્દ્રિયાણાં વિષયૌન્મુખ્યે કથં કામાદિજયઃ ઇત્યાકાઙ્ક્ષામુચ્યતે । ધન્વના ધનુષા તદઙ્કનપ્રભાવેણૈવગાઃ ઇન્દ્રિયાણિ જયેમ ।
ઇન્દ્રિયજયે ન ચ પ્રસઙ્ખ્યાનાખ્યાવસ્થાલાભે ધન્વના આજિં અજન્તિ ગચ્છન્તિ પરબ્રહ્મગન્તારોઽસ્મિન્નિતિ આજિમાર્ગઃ તં જયેમ । ધનુરઙ્કનપ્રસન્નેશ્વરપ્રદર્શિતયા સુષુમ્નયા નાડ્યા બહિર્નિષ્ક્રમ્ય અર્ચિરાદિમાર્ગેણ પરબ્રહ્મ ગચ્છેમેત્યર્થઃ । નન્વનિર્લીનમાયાન્વયસ્ય કથમીશ્વર પ્રસત્તિરિત્યા શઙ્કયાહ । ધનુઃ કર્તૃ શત્રુભૂતમનાદિમાયાસમ્બધસ્ય સંસારપાતનૌન્મુખ્યં અપકૃણોતિ અપનયતિ નાશયતિ યદ્વા તસ્ય મનોરથાભાવં સમ્પાદયતિ નનુ સત્સુસઞ્ચિતાદિકર્મસુ કથં માયાસમ્બધસ્ય સંસારપાતનૌર્મુખ્ય વિનાશ ઇત્યાહ । ધન્વના ધનુષા સર્વાઃ પ્રદિશઃ સર્વદિગ્વર્તિ નાનાયોનિજન્મપ્રદાનસમર્થાનિ સર્વાણિ કર્માણિ જયેમ નાશયામ ઇત્યર્થઃ ।

શ્રીમદ્વાલ્મીકીયે રામાયણે કિષ્કિન્ધાકાણ્ડે-
તદસ્ત્રં તસ્ય વીરસ્ય સ્વર્ગમાર્ગપ્રભાવનમ્ ।
રામબાણાસનક્ષિપ્તમાવહત્ પરમાં ગતિમ્ ॥ ૩॥

યો વૈ નિત્યં ધનુર્બાણાઙ્કિતો ભવતિ । સ પાપ્માનં તરતિ । સ સંસારં તરતિ ।
સ ભગવદાશ્રિતો ભવતિ । સ ભગવદ્રૂપો ભવતીત્યથર્વણીયા શ્રુતિઃ ॥ ૪॥

અગસ્ત્ય સંહિતાયાં અગસ્ત્ય વાક્યં સુતીક્ષ્ણં પ્રતિ-
વામે કરે ધનુઃ કુર્યાદ્દક્ષિણે બાણમેવ ચ ।
સબિન્દુન્તિલકં કુર્યાન્ મુક્તિ ભાગી મવેન્નરઃ ॥ ૫॥

ઉભાભ્યામપિરેખાભ્યાન્તિલકઃ પરિકથ્યતે ।
હરિપાદસ્થિતં બિન્દું પીતં ચ પરિધાર્યતે ॥ ૬॥

તિલકં રામરૂપેણ બિન્દુરૂપેણ ભૂમિજામ્ ।
ધૃત્વા ચ રામ ભક્તાના મગ્રગણ્યો ગુણાગ્રણીઃ ॥ ૭॥

ભ્રુવોન્તાદપિ ચારભ્ય લલાટાન્તે ચ ધારયેત્ ।
મનોહરં તથા મધ્યે અન્તરં યુગ્મમઙ્ગુલમ્ ॥ ૮॥

રામાયુધાઙ્કિતં દૃષ્ટ્વાશિરસાપ્રણમેનુયઃ ।
ષષ્ઠિવર્ષ સહસ્રાણિ બ્રહ્મલોકે મહીયતે ॥ ૯॥

યા ગતિર્યોગયુક્તાનાં મુનીનાં બીતરાગિનામ્ ।

ધનુર્બાણાઙ્કિતે નૈવ સા ગતિર્લભ્યતે ક્ષણાત્ ॥ ૧૦॥

બાહુમૂલે ધનુર્બાણે નાઙ્કિતો રામ કિઙ્કરઃ ।
શતિલેનાથ તપ્તે ન તસ્ય મુક્તિર્ન સંશયઃ ॥ ૧૧॥

શીતલાચ્છતગુણમ્પ્રોક્તં તપ્તસ્ય પરિધારણે ।
અઙ્કિતાસ્સર્વ કાલેસ્યુશ્ચતુર્વણાશ્રમાદયઃ ॥ ૧૨॥

ચક્રાચ્છત ગુણમ્પ્રોક્તં ફલં બાણાદિ ધારણે ।
સર્વેષાં રામભક્તાનાં રામ મુદ્રાભિધારણમ્ ॥ ૧૩॥

નાઙ્કિતો ચાપબાણાભ્યાં ન મન્ત્રોસ્તિષડક્ષરઃ ।
ન નામ રામ સમ્બન્ધિ ન રામોપાસકો ભવેત્ ॥ ૧૪॥

મયાવૈ પ્રોચ્યતે પુત્ર મુદ્રામાહાત્મ્ય મેવ ચ ।
સ્વગાત્રે ધારયેદ્યોપિ સ રામોપાસકો મહાન્ ॥ ૧૫॥

મહાશિવ સંહિતાયાં અગસ્ત્ય વાક્યં સુતીક્ષ્ણં પ્રતિ-
રામાયુધાભ્યાં તપ્તાભ્યાં સીતાયાઃ મુદ્રયાસહ ।
અઙ્કિતા યે મહાપ્રાજ્ઞા નિત્યમુક્તાશ્ચ મુક્તિદાઃ ॥ ૧૬॥

મુનેસ્મિન્ભારતે વર્ષે ચાપ બાણાઙ્કિતા નરાઃ ।
સ્વપરં કુલ સાહસ્રં તારયન્તિ સુખેન વૈ ॥ ૧૭॥

યેષાં કુલેતુ એકોપિ રામાયુધયુતઃ સુધીઃ ।
તેપિયાન્તિ પરંલોકં યત્ર યોગ મખાદિભિઃ ॥ ૧૮॥

ચિરં ગતાહિ નરકે પૂર્વજા યસ્ય કસ્ય વૈ ।
રામાયુધાઙ્કિતે વંશે તેપિ યાન્તિ પરાઙ્ગતિમ્ ॥ ૧૯॥

યા ગતિર્યોગ યુક્તાનાં નૈષ્ઠિકાનાં ચ ન્યાસિનામ્ ।
દુર્લભાન્તાં ગતિં ચૈવ પ્રાપ્નોતિ ધનુષાઙ્કિતઃ ॥ ૨૦॥

ધનુષાઙ્કિત બાહુભ્યા મર્ચનં દેવ પિતૃણામ્ ।
તસ્ય તે પિતૃદેવાશ્ચ ગચ્છન્તિ પરમં પદમ્ ॥ ૨૧॥

ધનુઃ શરાઙ્કિતોમર્ત્યો યદ્યત્કુર્યાચ્છભમ્મુને ।
તત્તચ્છતગુણં યાતિ વિપરીતતુનિષ્ફલમ્ ॥ ૨૨॥

યસ્ય શ્રાદ્ધે ચ હોમે ચ હોતારો ધનુષાઙ્કિતાઃ ।
તસ્યતેપિતૃદેવાશ્ચ સુધાં પ્રાશ્નન્તિ મોદિતાઃ ॥ ૨૩॥

યેષુ શ્રાદ્ધેષુ હોમેષુ ન કોપિ ધનુષાઙ્કિતઃ ।
તત્રપિણ્ડાહુતિર્યાતિ નિષ્ફલત્વં ન સંશયઃ ॥ ૨૪॥

સીતાયાઃ તપ્તમુદ્રાઙ્ચ શ્રીરામસ્યાયુધેઉભે ।
ધારયન્ભુવનં સદ્યઃ પુનાત્યેવ સુનિશ્ચિતમ્ ॥ ૨૫॥

બ્રહ્માણ્ડપુરાણે કૌશલખણ્ડે શ્રીરામ ગીતાયામ્-
શ્રીરામચન્દ્ર વાક્યં વસિષ્ઠ પ્રતિ-
ધનુર્વાણાદિ ચિન્હાનાં ધારિણં તિલકાન્વિતમ્ ।
તુલસીકાષ્ઠ માલાઢ્યં તં જાનીતુ સુ વૈષ્ણવમ્ ॥ ૨૬॥

પદ્મપુરાણ સદાચાર સઙ્ગ્રહે-
આદ્યસ્તુ વૈષ્ણવઃ પ્રોક્તઃ શઙ્ખ ચક્રાઙ્કિતોહરેઃ ।
ધારણં ચોર્ધ્વપુણ્ડ્રણાં તન્મન્ત્રાણાં પરિગ્રહઃ ॥ ૨૭॥

અચર્નં જપ ધ્યાનં ચ તત્પાદોદકમેવ ચ ।
તન્નિવેદિત ભોજ્યં ચ દ્વાદશી વ્રત નિષ્ઠિતમ્ ॥ ૨૮॥

તુલસીરોપણંવિષ્ણોર્દેવ દેવસ્ય શાર્ઙ્ગિણઃ ।
ભક્તિઃ ષોડ્શધાપ્રોક્તાભવબન્ધ વિમુક્તયે ॥ ૨૯॥

સર્વેષામેવ દેવાનાં નમામિ પુરુષોત્તમમ્ ।
પૂજનીયોહરિર્નિત્યં બ્રાહ્મણાનાં વિશેષતઃ ॥ ૩૦॥

તસ્માદ્વૈ બ્રાહ્મણોનિત્યં વિધિવત્પૂજયેદ્ધરિમ્ ।
તચ્ચિન્હૈ રેકિતઃ શ્રીશપદં પ્રાપ્નોત્ય સંશયઃ ॥ ૩૧॥

ચક્રં વા શઙ્ખ ચક્રં વા શાર્ઙ્ગ ચાપં શરં તથા ।
હુતાગ્નિ નૈવ સન્તપ્તં સર્બૈ પાપ વિમુક્તયે ॥ ૩૨॥

ધારયિત્વાચ્ચ વિધિવદ્બ્રહ્મ કર્મ સમાચરેત્ ॥ ૩૩

શ્રીમન્મહારામાયણે શિવ વાક્યં પાર્વતીં પ્રતિ-
યે જાપકાભગવતશ્ચ તપસ્વિનોયે
પૂજારતાઃ શ્રુતિરતાશ્ચ વિરાગયુક્તાઃ ।
જ્ઞાનાર્ણવાસ્તિલકદામધરા યશસ્વિ-
નસ્તીર્થાટના શુભગુણાઃ શુભકર્મયુક્તાઃ ॥ ૩૪॥

સર્વૈર્ગુણૈર્નિયમ સંયમનિત્યયુક્તો
નિષ્કલ્મષઃ સકલસિદ્ધિકરશ્ચનિત્યમ્ ।
યોનાઙ્કિતો ધનુશ્શરૈર્ન ચ મન્ત્ર રાજ-
સ્યોપાસકો ન સજનો રઘુનન્દનસ્ય ॥ ૩૫॥

શ્રીરામસંસ્કારવિવર્જિતાયે નિષ્પુચ્છ શ ૃઙ્ગાપશવોનરાસ્તે ।
શક્તાન વેદાઅભિવર્ણિતં યન્ત્વત્તોમયાખ્યાત મવિસ્તરેણ ॥ ૩૬॥

અહં વિધાતા ગરુડ્ધ્વજશ્ચ રામસ્યવાલે સમુપાસકાનામ્ ।
ગુણાનનન્તાં કથિતું ન શક્તાઃ સર્વેષુ ભૂતેષ્વપિ પાવનાસ્તે ॥ ૩૭॥

ઇતિ શ્રીરામનવરત્નસારસઙ્ગ્રહે શ્રીરામાયુધ પ્રભાવ સૂક્ષ્મવર્ણનં નામ ચતુર્થં રત્નમ્ ॥ ૪॥

## અધ્યાય ૫

જીવ બ્રહ્મ સબમેં રમ્યોં, રમુ ક્રીડા સો રામ ।
રામ ઉપાસક બિનુ ન મિલુ, નિજ સ્વરૂપ પરધામ ॥ ૧॥

તત્ર પ્રમાણ માહવસિષ્ઠ સંહિતાયામ્-
ન શ્રીરામ વ્રતાદન્યદ્વ્રતં સર્વાર્થ સાધનમ્ ।
ન રામારાધનાદન્યો યજ્ઞો વેદોપિ દૃશ્યતે ॥ ૨॥

રામદાસ્યાત્પરો ધર્મો યસ્મિન્નન્યો નિરૂપ્યતે ।
શાસ્ત્રં તન્મ્લેક્ષ બૌદ્ધાનાં વિશ્વસેન્નવિચક્ષણઃ ॥ ૩॥

મહાશમ્ભુ સંહિતાયાં અગસ્ત્ય વાક્યં સુતીક્ષ્ણં પ્રતિ-
કૃપા ચ સાધનં સિદ્ધિર્ભક્તિ શ્રીમૈથિલી પતેઃ ।
અન્યત્વ કેવલ શ્રમં સાધિતં મત વાદિભિઃ ॥ ૪॥

શુદ્ધં દ્વૈત મત વિદ્ધિ સેવ્ય સેવક ભાવદમ્ ।
સામીપ્યં ચ સુમુક્તિં ચ નિત્યં ગોલોક ધામકમ્ ॥ ૫॥

જ્ઞાન વૈરાગ્ય સન્તોષા ક્ષમાશીલાદિ કાનિ વૈ ।
તુલસી કાષ્ઠ સંયુક્તા વિરેજૂ રામ ભાવકાઃ ॥ ૬॥

યજ્ઞોપવીતં ધૌતં ચ કૌપીનાચ્છાદનં પરમ્ ।
ગૃહ્ણતિ ધાતુ પાત્રં વા તુંવિકાં રામ સેવકાઃ ॥ ૭॥

શ ૃઙ્ગારં મૈથિલી કૃત્યં શ્રિયં બિન્દું ચ ચન્દ્રિકામ્ ।

કરોતિ રસિકો નિત્યં તિલકં તન્તુ મન્યતે ॥ ૮॥

શીલ સન્તોષ સત્યાદિ નિષ્કામાર્જવ લક્ષણમ્ ।
ભોજ્યં મહાપ્રસાદં ચ પાનં પાદોદકં સદા ॥ ૯॥

દણ્ડવત્પ્રોક્તમુભયં વન્દનં સ્વામિ દક્ષિણે ।
ગુરું હરિ સમં મન્યેત્ સેવ્યં ચૈવ પરિક્રમમ્ ॥ ૧૦॥

અન્યચ્ચ-
તુલસી માલ તિલકં ધનુર્વાણાઙ્કિતૌ ભુજૌ ।
રામમન્ત્રશ્ચ તન્નામ સંસ્કારાઃ રામસેવકે ॥ ૧૧॥

અક્રોધ વૈરાગ્ય જિતેન્દ્રિયત્વં ક્ષમાદયા સર્વજન પ્રિયત્વમ્ ।
નિર્લોભદાતા ભયશોકહર્તા ભક્તસ્યચિન્હાનિ દાન્તરાણિ ॥ ૧૨॥

એવં સર્વ ગુણૈર્યુક્તઃ હરિભક્તિપરાયણઃ ।
બાહ્યાભ્યન્તર સંશુદ્ધસ્તતોયાતિ પરાઙ્ગતિમ્ ॥ ૧૩॥

પુનરપિ મહાસદાશિવ સંહિતાયામ-
શ્રીમન્નારાયણસ્યૈવ શિષ્યા યે કથિતાઃ શુભાઃ ।
પૂર્વોક્તા રામમન્ત્રસ્ય યે ભૂંવસ્તે તથા ભવન્ ॥ ૧૪॥

ભવિષ્યન્તિ કલૌહ્યન્તે પ્રાકૃતા મતવાદિનઃ ।
મન્ત્ર નામાનુચિન્હાનિ કલ્પયિષ્યન્તિ માનિનઃ ॥ ૧૫॥

યથા રાત્રૌ નાર્ક ભાસોદીપ તેજઃ પ્રશસ્યતે ।
આદિમૂલાદ્ધતં ભ્રાષ્ટ્યમધોમૂલં સમાશ્રિતાઃ ॥ ૧૬॥

સ્પર્દ્ધયિષ્યન્તિ ચાન્યોન્યં યથા મોહં ગતાબુધાઃ ।
યથા મતિસ્તથાગમ્યં ગમિષ્યન્તિ વિધાર્મિકાઃ ॥ ૧૭॥

શ્રીરામ મન્ત્રસ્યાંશાનિ મન્ત્રાણ્યન્યાનિ વિદ્ધિ ચ ।
હનુમતાચાર્યેણાહો રામધામસતાં પદમ્ ॥ ૧૮॥

શ્રીજાનક્યાઃ પતિં સર્વે ભજધ્વં મઙ્ગલાયનમ્ ।
રામમન્ત્રેણાયુધાભ્યાં યુક્તાઃ શુશુભિરે ભુવિ ॥ ૧૯॥

સુરગુર્વાદિ ગુરવો રામ મન્ત્રસ્ય સેવકાઃ ।
શ્રીગુરોર્મારુતેઃ શિષ્યો સુગ્રીવશ્ચ કપીશ્વરઃ ॥ ૨૦॥

શ્રીરામસ્યા યુધૌ તસ્મૌ રામમન્ત્રં વ્યધારયત્ ।

પશ્ચાષ્ટા દશ સઙ્ખ્યાતા સ્વસૈન્યાશ્ચ હનુમતઃ ॥ ૨૧॥

દીક્ષિતાસ્તેન મન્ત્રેણ ધનુર્વાણેન ચાઙ્કિતાઃ ।
હનુમચ્છિષ્યતાં પ્રાપ્તો મહારાજો વિભીષણઃ ॥ ૨૨॥

રામાયુધાભ્યાં તપ્તાભ્યામઙ્કિતશ્ચ સમુદ્રયા ।
તથા તસ્ય પ્રજાઃ સર્વા ચિન્હિતા રામ લાઞ્છનૈઃ ॥ ૨૩॥

રાજમાર્ગ મિમં બિદ્ધિ રામોક્તં જાનકી કૃતમ્ ।
યદૃતે ચાન્ય માર્ગાસ્તુ ચૌરાણાં બીથિકા યથા ॥ ૨૪॥

આદ્યાચાર્યં હનુમન્તં ત્યક્ત્વાહ્યન્ય મુપાસતે ।
ક્લિદયન્તિ ચૈવતે મુગ્ધા મૂલહા પલ્લવાશ્રિતાઃ ॥ ૨૫॥

શ્રીમૈથિલ્યાશ્ચ મન્ત્રંહિ શ્રીગુરું મારુતં મહત્ ।
સખી ભાવં દમ્પતીષ્ટં ભુક્તિ મુક્તિ પ્રદં સદા ॥ ૨૬॥

શ્રીજાનકી સમ્પ્રદાયં રામ રાસ મનન્યતામ્ ।
ઋતે કેપિ ન યાસ્યન્તિ વાઞ્છિતં ફલ મેવ ચ ॥ ૨૭॥

શ્રીરામસ્યાયુધૌ તપ્તૌ જાનકી મુદ્રિકાં વિના ।
પારમેષ્ઠચં ન પ્રાપ્નોતિ જ્ઞાનાદિ સાધનૈ રપિ ॥ ૨૮॥

રામાયુધાઙ્કિતશ્ચૈવ તનું ત્યજતિ યઃ પુમાન્ ।
યામ્યાશ્ચપાર્ષદાસ્તત્ર નમન્તિશિરસાહિતમ્ ॥ ૨૯॥

યુગ્મ મન્ત્રં ચ યો નિત્યં ધનુર્વાણૌ ચ ધારયેત્ ।
સ જાનકીવલ્લભસ્ય સામીપ્યં સુખમૃચ્છતિ ॥ ૩૦॥

યુગ્મ મન્ત્રં વિનાનાસ્તિ મન્ત્રઃ કોપિ સુખપ્રદઃ ।
જાનકીવલ્લભોપાસ્તિં વિનોપાસ્તિર્નવલ્લભા ॥ ૩૧॥

હનુમત્પરમાચાર્યં વિનાચાર્યો ન કોપિ ચ ।
ઇતિ પદ્ધતિ નિર્ણીતં પૂર્વોક્તં ચ મયોદિતમ્ ॥ ૩૨॥

સદાશિવ સંહિતાયાં સૌમિત્રિ વાક્યં વેદાન્પ્રતિ-
સીતાઙ્કિતો ધનુર્વાણાત્ પ્રથમં ચ મહા શિવઃ ।
સીતયાચાઙ્કિતઃ પશ્ચાદ્ધનૂમાન્શ્ચ હરિ પ્રિયઃ ॥ ૩૩॥

મહાશમ્ભુઃ શિવં પ્રાહ સ શિવો નારદં તથા ।
નારદશ્ચાહ વાલ્મીકિં વાલ્મીકિશ્ચ કુશીલવૌ ॥ ૩૪॥

હનૂમાન્સ્તુ અગસ્ત્યાય અગસ્ત્યશ્ચ સુતીક્ષ્ણકમ્ ।
સુતીક્ષ્ણેન મહાભાગા ચાઙ્કિતા વહવો મુને ॥ ૩૫॥

ભવિષ્યન્તિ કલૌ ઘોરે જીવાહરિ વહિર્મુખાઃ ।
તેષામુદ્ધર્ણાર્થાય સ્વરૂપજ્ઞાન હેતવે ॥ ૩૬॥

રામાજ્ઞયા હનૂમાંશ્ચ માધ્વાચાર્ય પ્રભાકરઃ ।
રામાનન્દઃ સ્વયં રામઃ પ્રાદુર્ભૂતો મહીતલે ॥ ૩૭॥

વિનાચિન્હં ધનુર્વાણં બિના મન્ત્ર ષડક્ષરમ્ ।
પૂજાંયશ્ચ પ્રકુર્વીત રાઘવો ન પ્રસીદતિ ॥ ૩૮॥

ધર્મં દદ્યાત્ ધનં દદ્યાત્ પ્રાણં દદ્યાત્ યશસ્તથા ।
ધ્યાન મન્ત્રો ન દાતવ્ય ઋતેરામસ્ય સંસ્કૃતિમ્ ॥ ૩૯॥

કલ્પકોટિ સહસ્રાણિ કલ્પ કોટિ શતાનિ ચ ।
પઞ્ચાઙ્ગોપાસનેનૈવ રામે ભક્તિઃ પ્રજાયતે ॥ ૪૦॥

શ્રીગોસ્વામિ વાક્યં દોહાવલી ગ્રન્થે-
તુલસી રામહિ છાડિ કે, કરૈ ઔર કો જાપ ।
તાકે મુખ મેં દીજિયે, નવસાદર કો બાપ ॥ ૪૧॥

શ્રીઅગ્રદાસ કુણ્ડલિયા છન્દ-
ભુસ ઊપર કો લેપનો અરુ બારૂ કી ભીતિ ।
અરુ બારૂ કી ભીતિ ભૂત કી મનહુ મિઠાઈ ।
બાજીગર કો બાગ સ્વપ્ન મેં નવ નિધિ પાઈ ॥

અજયાઅસ્તન કણ્ઠ તુચ્છ બાદર કી છાયા ।
પૂરબ બસ્તુ બિસારિ પછિમ દિસિ ટૂઢ઼ન ધાયા ॥

આન ઉપાસક રામ બિનુ અગ્ર સુ વૈસી રીતિ ।
ભુસ ઊપર કો લેપનો અરુ બારૂ કી ભીતિ ॥ ૪૨॥

ઇતિ શ્રીરામનવરત્નસારસઙ્ગ્રહે ઉપાસનાલક્ષણવર્ણનં નામ પઞ્ચમં રત્નમ્ ॥ ૫॥

## અધ્યાય ૫

પરમ પુરુષ દશરથ સુવન ચરિત અમિત શ્રુતિસાર ।
રામાયણ યક અક્ષરૌ કહત નાસ સંસાર ॥ ૧॥

કર્મ યોગ વૈરાગ્ય દૃઢ બ્રહ્મ જ્ઞાન જપ ધ્યાન ।
રામચરણ નહિં રામ મિલ બિનુ ઉપાસના જ્ઞાન ॥ ૨॥

તત્ર પ્રમાણમાહ વાલ્મીકીયે લવ કુશ વાક્યે-
વેદવેદ્યે પરે પુંસિ જાતે દશરથાત્મજે ।
વેદઃ પ્રાચેતસાદાસીત્ સાક્ષાત્ રામાયણાત્મના ॥ ૩॥

ચરિતં રઘુનાથસ્ય શતકોટિપ્રવિસ્તરમ્ ।
એકૈકમક્ષરં પુંસાં મહાપાતકનાશનમ્ ॥ ૪॥

વાલ્મીકીયે અયોધ્યાકાણ્ડે-
સૂર્યસ્યાપિ ભવેત્સૂર્યો હ્યગ્નેરગ્નિઃ પ્રભોઃ પ્રભુઃ ।
શ્રિયઃ શ્રીશ્ચ ભવેદગ્ર્યા કીર્ત્યાઃ કીર્તિઃ ક્ષમાક્ષમા ॥ ૫॥

દૈવતં દેવતાનાં ચ ભૂતાનાં ભૂતસત્તમઃ ।
તસ્ય કે હ્યગુણા દેવિ દેશે વાપ્યથવાવને ॥ ૬॥

પૃથિવ્યા સહ વૈદેહ્યા શ્રિયા ચ પુરુષર્ષભઃ ।
ક્ષિપ્રં તિસૃભિરેતાભિ સહ રામોઽભિષેક્ષ્યતે ॥ ૭॥

સુન્દરકાણ્ડે હનુમદ્વાક્યં રાવણં પ્રતિ-
બ્રહ્મા સ્વયમ્ભૂશ્ચતુરાનનો વા રુદ્રસ્ત્રિણેત્રસ્ત્રિપુરાન્તકો વા ।
ઇન્દ્રો મહેન્દ્રઃ સુરનાયકો વા ત્રાતું ન શક્તા યુધિ રામવધ્યમ્ ॥ ૮॥

સુન્દરકાણ્ડે ત્રિજટા વાક્યં (દક્ષિણાત્ય પાઠ)-
પરં બ્રહ્મ પરં તત્વં પરં જ્ઞાનં પરં તપઃ ।
પરં બીજં પરં ક્ષેત્રં પરં કારણ કારણમ્ ॥ ૯॥

યુદ્ધકાણ્ડેપિ-
આત્માનં માનુષં મન્યે રામં દશરથાત્મજમ્ ।
યોઽહં યસ્ય યતશ્ચાહં ભગવાન્સ્તદ્બ્રવીતુ મે ॥ ૧૦॥

સ્કન્દપુરાણે શિવ વાક્યમ્-
સકૃદુચ્ચરિતં યે ન રામાયણ મનુત્તમમ્ ।

ભસ્મી ભવન્તિ પાપૌઘા હૃદિરામસ્તુ તદ્રવાત્ ॥ ૧૧॥

શ્રીમદ્રામાયણસ્યૈવ શ્રવણાત્કીર્તનાચ્છિવે ।
સદ્યઃ પુનન્તિ વૈ સર્વે ચિરકાલં તથાન્યતઃ ॥ ૧૨॥

શ્રીમન્મહારામાયણે શઙ્કર વાક્યં પાર્વતીં પ્રતિ-
ગુરુ મન્ત્રાનુસારેણ લયં ધ્યાનં જપં તથા ।
પાઠં તીર્થં ચ સંસ્કાર મિષ્ટં સર્વં પરાત્પરમ્ ॥ ૧૩॥

ઇષ્ટ પૂજાં પ્રકુર્યા દ્વૈ તત્કથાં શ‍ૃણુયાત્પઠેત્ ।
તન્દેશ વ્યાપકં વિશ્વં મન્યેતસાપ્યુપાસના ॥ ૧૪॥

ન વિધિર્નનિષેધશ્ચ પ્રેમકુર્યાદ્રઘૂત્તમે ।
ઇન્દ્રિયાણામભાવઃ સ્યાત્સોઽનન્યોપાસકઃ સ્મૃતઃ ॥ ૧૫॥

ધ્યાને પાઠે જપે હોમે જ્ઞાને યોગે સમાધિભિઃ ।
વિનોપાસનયામુક્તિર્નાસ્તિસત્યં બ્રવીમિતે ॥ ૧૬॥

યૈઃ કૃતં ભક્તિવિજ્ઞાનમનન્યોપાસનંવિના ।
ન પ્રાપ્તિર્ભગવદ્રૂપે સત્યં સત્યં વદામિતે ॥ ૧૭॥

પદ્મપુરાણે શઙ્કર વાક્યં પાર્વતીં પ્રતિ-
ન તત્પુરાણં નહિ યત્ર રામો યસ્યાં ન રામો ન વ સંહિતાસા ।
સનેતિહાસો નહિ યત્ર રામઃ કાવ્યં ન તત્સ્યાન્નહિ યત્ર રામઃ ॥ ૧૮॥

શાસ્ત્રં ન તત્સ્યાન્નહિ યત્ર રામઃ તીર્થં ન તદ્યત્ર ન રામચન્દ્રઃ ।
યાગઃ સાગો નહિ યત્ર રામો યોગસ્સરોગો નહિ યત્ર રામઃ ॥ ૧૯॥

ન સા સભા યત્ર ન રામચન્દ્રઃ કાલોપ્યકાલો કલિરેવસોસ્તિ ।
સઙ્કીર્તતે યત્ર ન રામદેવો વિદ્યાપ્યવિદ્યા રહિતાત્વનેન ॥ ૨૦॥

સ્થાનં ન તદ્યત્ર ન રામકીર્તિઃ શ્રીરામનામા મૃતશૂન્યમાસ્યમ્ ।
સર્પાલયં પ્રેત ગૃહં ગૃહં તદ્યત્રાચ્યતે નૈવ મહેન્દ્ર પૂજ્યઃ ॥ ૨૧॥

ઉક્તે ન કિં સ્યાદ્દ્નાત વિશ્વં સર્વં મુધાસ્યાદ્યદિ રામ શૂન્યમ્ ।
તદેવ સત્યં વિહિતં તદેવ તદેવ યોગ્યં રઘુનાથ યુક્તમ્ ॥ ૨૨॥

સર્વેષાં વેદસારાણાં રહસ્યન્તે પ્રકાશિતમ્ ।
એકોદેવો રામચન્દ્રો વ્રતમન્યં ન તત્સમમ્ ॥ ૨૩॥

મન્ત્રસ્ત્વેકરચતન્નામ શાસ્ત્રં તદ્ધેવતત્સ્તુતિઃ ।

તસ્માત્સર્વાત્મના રામચન્દ્રં ભજ મનોહરમ્ ॥ ૨૪॥

યેષાન્તુ માનસં રામે લગ્ને નેહ મનોરમે ।
બઞ્ચિતા બિધિનાપાપાસ્તેવૈ ક્રૂરતરાશ્ચહિ ॥ ૨૫॥

રામં શ‍ૃણ્વન્તિ સદ્ભક્ત્યા સમ્ભૂતાઃ કથયન્તિ યે ।
શ્રયન્તે ચ સુકથ્યન્તે દેવૈરિન્દ્રાદિ ભિસ્તુ તે ॥ ૨૬॥

યેષાં રામઃ પ્રિયો નૈવ રામેન્ચૂનત્વ દર્શિનામ્ ।
દ્રષ્ટવ્યં ન મુખ તેષાં સઙ્ગતિસ્તુ કુતસ્તરામ્ ॥ ૨૭॥

તત્ર પ્રમાણ વાલ્મીકીયે અયોધ્યાકાણ્ડે-
યશ્ચરામં ન પશ્યેત્તુ યઞ્ચ રામો ન પશ્યતિ ।
નિન્દિતસ્સર્વ લોકેષુ સ્વાત્માપ્યેનં વિગર્હતે ॥ ૨૮॥

અથ શ્રીરામ ઐશ્વર્ય પ્રતાપાદિ પરિપૂર્ણ તત્ર પ્રમાણ શ્રુતિઃ-
ૐ ભૃગુર્વૈ વારુણિર્વરુણં પિતરમુપસસાર અધીહિ ભો ભગવો બ્રહ્મેતિ સો વ્રવીદ્રામ એવ પરબ્રહ્મ રામાદન્યં ન કિઞ્ચન યત્ત એતે રામાદેવોત્પદ્યન્તે રામ એવ વિલીયન્તે રામ એવ સ્થિતિં લભન્તે તસ્માદ્રામ એવ વિભુરિતિ ॥ ૨૯॥

અથ્ શ્રીરામતાપનીયોપનિષત્-
પ્રકૃત્યા સહિત શ્યામઃ પતિવાસા પ્રભાકરઃ ।
દ્વિભુજઃ કુણ્ડલીરત્નમાલી ધીરો ધનુર્ધરઃ ॥ ૩૦॥

અથ વેદસારોપનિષદ્ ઉત્તરાર્ધ-
યસ્યાંશે નૈવ બ્રહ્મવિષ્ણુ મહેશ્વરા અપિજાતા મહાવિષ્ણુર્યસ્ય દિવ્યગુણાશ્ચ સ એવ કાર્ય કારણયોઃ પરઃ પરમપુરુષો રામો દાશરથિર્વભૂવ ॥ ૩૧॥

દેહી દેહ વિભાગો નસ્યાત્ સચ્ચિદાનન્દ વિગ્રહ ઇતિ શ્રુતિઃ ॥ ૩૨॥

રામાત્ સઞ્જાયતે કામઃ કામાદ્વિશ્વં પ્રજાયતે ।
તસ્માદ્ધનુર્ધરાત્સર્વે દ્વિભુજામૂલરૂપિણઃ ઇતિ શ્રુતિઃ ॥ ૩૩॥

નિત્યો નિત્યાનાં ચેતનશ્ચેતનાનામેકોબહૂનાંયો વિદધાતિ કામાન્ ઇતિ શ્રુતિઃ ॥ ૩૪॥

તત્ર પ્રમાણમાહ આનન્દાખ્ય સંહિતાયાં -
સ્થૂલમષ્ટ ભુજં પ્રોક્તં સૂક્ષ્મં ચૈવ ચતુર્ભુજમ્ ।
પરન્તુદ્વિભુજં રૂપં તસ્માદેતત્ ત્રયંયજેત્ ॥ ૩૫॥

અન્યચ્ચ-

આનન્દો દ્વિવિધઃ પ્રોક્તોમૂર્તશ્ચામૂર્ત એવ ચ ।
અમૂર્તસ્યાશ્રયો મૂર્તઃ પરમાત્મા નરાકૃતિઃ ॥ ૩૬॥

હરેસ્તનુભાઃ બ્રહ્મેતિ શ્રુતિઃ ।

બ્રહ્માણ્ડપુરાણેપિ-
સીતાયાશ્ચ ત્રયોપ્યંશાઃ શ્રીભૂલીલાદિ ભેદતઃ ॥ ૩૭॥

શ્રી ભવેદ્ રુક્મિણી ભૂઃ સ્યાત્ સત્યભામા દૃઢવ્રતા ।
નીલાસ્યાદ્ રાધિકા દેવી સર્વલોકૈક પૂજિતા ॥ ૩૮॥

જનકસ્ય રાજ્ઞઃ સદ્માનિ સીતોત્પન્ના સા સર્વપરાનન્દમૂર્તિર્ગાયન્તિ મુનયોઽપિ દેવાશ્ચ કાર્યકારણાભ્યામેવ પરા તથૈવ કાર્યકારણાર્થે શક્તિર્યસ્યાઃ વિધાત્રીશ્રીગૌરીણાં સૈવકર્ત્રી, રામાનન્દસ્વરૂપિણી સૈવ જનકસ્ય યોગફલમિવ વિભાતિ ઇત્યથર્વણે ઉત્તરાર્દ્ધે શ્રુતિઃ ॥ ૩૯॥

અથ શ્રીરામ નામ વર્ણનમ્-
તત્ર પ્રમાણમાહ અગસ્ત્ય સંહિતાયામ્-
બહુધારામ મન્ત્રોયં સંસ્કારાન્નૈવ વાઞ્છતિ ।
રસનાસ્પ્ટક્ફલત્યેવ અગ્નિરસંસ્કૃતો યથા ॥ ૪૦॥

ગુરુવક્ત્રાદ્રામમન્ત્રો યસ્ય કર્ણે પ્રવેશકૃત્ ।
શુદ્ધઃ સ વૈષ્ણવો જ્ઞેયઃ વેદાસ્સર્વે વદન્તિહિ ॥ ૪૧॥

અગસ્ત્ય સંહિતાયામ્-
સર્વેષુ મન્ત્ર વર્ગેષુ શ્રેષ્ઠં વૈષ્ણવમુચ્યતે ।
ગાણપત્યેષુ શૈવેષુ શાક્ત સૌરેષ્વભીષ્ટદમ્ ॥ ૪૨॥

વૈષ્ણવેષ્વપિ મન્ત્રેષુ રામમન્ત્રાઃ ફલાધિકાઃ ।
વિનૈવ દીક્ષાં વિપ્રેન્દ્ર પુરશ્ચર્યાં વિનૈવહિ ॥ ૪૩॥

વિનૈવન્યાસ વિધિના જપમાત્રેણ સિદ્ધિદાઃ ।
મન્ત્રરાજૈતિપ્રોક્તઃ સર્વેષામુત્તમોત્તમઃ ॥ ૪૪॥

દૈન્યં દિનન્તુ દુરિતં પક્ષ માસર્તુવર્ષજમ્ ।
સર્વન્દહતિ નિશ્શેષં તૂલાચલ મિવાનલઃ ॥ ૪૫॥

બ્રહ્મહત્યા સહસ્ત્રાણિ જ્ઞાનાજ્ઞાન કૃતાનિ ચ ।
સ્વર્ણસ્તેય સુરાપાન ગુરુતલ્પાયુતાનિ ચ ॥ ૪૬॥

કોટિ કોટિ સહસ્ત્રાણિદ્યુપાપાનિ યાન્યપિ ।

સર્વાણ્યપિ પ્રણશ્યન્તિ રામમન્ત્રાનુકીર્તનાત્ ॥ ૪૭॥

શ્રીરામતાપનીયે-
ય એતત્ તારકં બ્રાહ્મણોનિત્યમધીતે સપાપ્માનં તરતિ સ મૃત્યું તરતિ સભ્રૂણહત્યાં તરતિ સ સર્વ હત્યાં તરતિ સ સંસારન્તરતિ સ વિમુક્તાશ્રિતોભવતિ સો મૃતત્વઞ્ચ ગચ્છતીતિ શ્રુતિઃ ॥ ૪૮॥

પ્રણવં કેવલમાકારો કારાકાર મર્દ્ધ માત્રા સહિતં તસ્માત્પ્રણવસ્ય ચાકારસ્ય ચોકારસ્ય ચ મકારસ્ય ચાર્દ્ધ માત્રસ્ય ચ ઇતિ શ્રુતિઃ ॥ ૪૯॥

આકારઃ પ્રથમાક્ષરોભવતિ ઉકારો દ્વિતીયાક્ષરોભવતિ મકારસ્તૃતીયાક્ષરોભવતિ અર્દ્ધમાત્રા ચતુર્થાક્ષરોભવતિ વિન્દુઃ પઞ્ચમાક્ષરોભવતિ નાદઃ ષષ્ઠાક્ષરો ભવતિ તારકત્વાત્તારકો ભવતિ તદેવતારકં બ્રહ્મત્વં વિદ્ધાતિશ્રુતિઃ ॥ ૫૦॥

અકારાક્ષરસમ્ભૂતઃ સૌમિત્રિર્વિશ્વભાવનઃ ।
ઉકારાક્ષર સમ્ભૂતઃ શત્રુઘ્નસ્તૈજસાત્મકઃ ॥ ૫૧॥

પ્રાજ્ઞાત્મકસ્તુ ભરતો મકારાક્ષર સમ્ભવઃ ।
અર્દ્ધમાત્રાત્કોરામો બ્રહ્માનન્દૈક વિગ્રહઃ ॥ ૫૨॥

તત્ર પ્રમાણ શ્રીમન્મહારામાયણે શિવ વાક્યં પાર્વતીં પ્રતિ-
નિશ્ચલં માનસં કૃત્વા સાવધાનાશ્શ ृણુપ્રિયે ।
ગુહ્યાદ્ગુહ્મ તરં તત્ત્વં વક્ષ્યેમૃતમયં મુદા ॥ ૫૩॥

રામનામ મહા વિદ્યે ષડભિર્વસ્તુભિરાવૃતમ્ ।
બ્રહ્મજીવ મહાનાદૈ સ્તૃભિરન્યદ્બ્ધામિતે ॥ ૫૪॥

સ્વરેણવિન્દુના ચૈવ દિવ્યયા માયયાપિ ચ ।
પ્રથકૃત્વેના વિભોગન સામ્પ્રતં શ ृણુ પાર્વતિ ॥ ૫૫॥

પરબ્રહ્મ મયો રેફો જીવોકારશ્ચ મસ્યયઃ ।
રસ્યાકારમયોનાદઃ રાયાદીર્ઘાસ્વરામતા ॥ ૫૬॥

મકારંવ્યઞ્જનંવિન્દુ ર્હેતુઃ પ્રણવમાયયોઃ ।
અર્દ્ધભાગાદુકારસ્યા દકારાન્નાદ રૂપિણઃ ॥ ૫૭॥

રકાર ગુરુ રાકારસ્તથા વર્ણ વિપર્જયઃ ।
મકારં વ્યઞ્જનં ચૈવ પ્રણવઞ્ચાભિધીયતે ॥ ૫૮॥

મસ્યા સવર્ણિન્તમત્વા પ્રણવે નાદ રૂપ ધૃક ।
અન્તર્ભૂતોભવેદ્રેફઃ પ્રણવે સિદ્ધિ રૂપિણી ॥ ૫૯॥

રામનામ્નઃ સમુત્પન્નઃ પ્રણવામોક્ષ દાયકઃ ।

રૂપં તત્વમસેશ્ચાસૌ વેદતત્વાધિકારિણઃ ॥ ૬૦॥

રકારસ્તદ પદો જ્ઞેયસ્ત્વં પદોકારૌચ્યતે ।
મકારો સિપદં ખઞ્જં તત્વમસિ સુલોચને ॥ ૬૧॥

બ્રહ્મેતિ તત્પદં વિદ્ધિત્વમ્પદં જીવ નિર્મલઃ ।
ઈશ્વરોસિપદમ્પ્રોક્તં તતો માયા પ્રવર્તતે ॥ ૬૨॥

વેદ સારં મહાવાક્યં યત્તત્વમસિ કથ્યતે ।
રામનામ્નશ્ચતત્સર્વં રમુક્રીડા પ્રવર્તતે ॥ ૬૩॥

વિજ્ઞાનસ્થો રકારસ્યાદકારો રામરૂપકઃ ।
મકારઃ પરમાભક્તી રમુક્રીડોચ્યતેતતઃ ॥ ૬૪॥

ચિદ્વાચકોરકાસ્યાત્સદ્વાચ્યાકાર ઉચ્યતે ।
મકારાનન્દકં વાચ્યં સચ્ચિદાનન્દ મવ્યયમ્ ॥ ૬૫॥

વ્યજનાચ્ચક્ષરોત્પત્તી રકારાદ્બ્રહ્મ ચાક્ષરમ્ ।
રેફો નિરક્ષરં બ્રહ્મ સર્વ વ્યાપી નિરઞ્જનઃ ॥ ૬૬॥

ઇચ્છાભૂતોક્ષરસ્તસ્ય ચાક્ષરસ્તેજ ઉચ્યતે ।
નિરક્ષરો ઘનસ્તેજો વર્તતે જાનકીપતેઃ ॥ ૬૭॥

સ્વયં નિરક્ષરાતીતો રામ એવ ઇતિ શ્રુતિઃ ।
બ્રહ્મજ્ઞાન નિમગ્ના યે ભજન્તિ સનકાદયઃ ॥ ૬૮॥

રકારોનલવીજંસ્યાત્ યે સર્વે વાડ્વાદયઃ ।
કૃત્વામનોમલંસર્વં ભસ્મ કર્મ શુભાશુભમ્ ॥ ૬૯॥

અકારો ભાનુવીજંસ્યાત્ વેદ શાસ્ત્ર પ્રકાશકઃ ।
નાશયત્યેવ સદ્દીપ્ત્યા યા વિદ્યાહૃદયે તમઃ ॥ ૭૦॥

મકારશ્ચન્દ્ર વીજં ચ સદ્દીપ્તિ પરિ પૂરણમ્ ।
ત્રિતાપંહરતે નિત્યં શીતલત્વં કરોતિ ચ ॥ ૭૧॥

રકરોમૂર્ધ્નિ સઞ્ચારસ્ત્રિકુટ્યાકાર ઉચ્યતે ।
મકારોધર્યયોર્મધ્યે લોમેલોમે પ્રતિષ્ઠિતઃ ॥ ૭૨॥

રકારો યોગિનાં ધ્યેયો ગચ્છન્તિ પરમં પદમ્ ।
અકારો જ્ઞાનિનાં ધ્યેયસ્તેસર્વે મોક્ષરૂપિણઃ ॥ ૭૩॥

પૂર્ણનામ મુદાદાસા ધ્યાયન્ત્યચલ માનસાઃ ।
પ્રાપ્નુવન્તિ પરાં ભક્તિં શ્રીરામસ્ય સમીપકમ્ ॥ ૭૪॥

નારાયણાદિ નામાનિ કીર્તિતાનિ બહૂન્યપિ ।
સમ્યગ્ભ ગવતસ્તેષુ રામનામ પ્રકાશકમ્ ॥ ૭૫॥

અન્યચ્ચ -
પઠિત સકલ વેદઃ શાસ્ત્રપારઙ્ગતોવા
યમનિયમપરોવા ધર્મ શાસ્ત્રાર્થકૃદ્વા ।
અપિતુ સકલતીર્થ વ્રાજકો વાહિતાગ્નિ-
ર્નહિ હૃદિયદિ રામઃ સર્વમેતદ્વૃથાસ્યાત્ ॥ ૭૬॥

નારાધિતો યદિહરિસ્તપસા તતઃ કિમ્
આરાધિતો યદિહરિસ્તપસા તતઃ કિમ્ ।
નાન્તર્વહિર્યાદિ હરિસ્તપસા તતઃ કિમ્
અન્તર્વહિર્યાદિ હરિસ્તપસા તતઃ કિમ્ ॥ ૭૭॥

સત્યોપાખ્યાને સૂત વાક્યં-
લોકેભવતુચાશ્ચર્યં જલાજ્જન્મ ધૃતસ્ય ચ ।
સિકતાયાશ્ચતૈલં તુ યત્નૈર્યાતુ કથઞ્ચન ॥ ૭૮॥

વિનાભક્તિં ન મુક્તિશ્ચ ભુજમુત્થાય ચોચ્યતે ।
યૂયન્ધન્યા મહાભાગા યેષાં પ્રીતિસ્તુ રાઘવે ॥ ૭૯॥

અથ બ્રહ્મણો વાક્યમ્-
અહોયક્ષત સત્રં પરિદધાસિ વસિષ્ઠત્વં પુરોધાસિ ત્વામેવ બ્રહ્મોદ્ભવં પરિ પશ્યન્તુધીરાઃ અનન્યમનસા ચિન્તયન્તુદેવાઃ સ્વર્ગેષુયજ્ઞાયા પ્યાયતાં ધિયઃ કૌશિકે ન સમગ્રં પ્રવિલીયતાં દેવાઃ વિરસિ ચારુરસિ તૂર્યં મઙ્ગલાયતાં એષ બ્રાહ્મણોવસિષ્ઠઃ અસ્ય પ્રયોજનાય યજ્ઞાય ભાનુવંશ્ય કૃતોદ્ભવઃ આચરણાય કર્મણોસ્ય અપ્રમેયાનિ કર્માણિ નાહં વભૂવ એષસ્તુ જ્ઞેયઃ સનીચૈસ્તન્નોગૃહ્ણાતિકાલે કાલે મઙ્ગલાય પરિપૂર્ણાદ્બ્રહ્મલોકાદિહાગતઃ પૂજ્યમાનાઃ સન્તુ આપઃ સુમનસ્ય મનોભવઃ દેવર્ષયઃ ગચ્છન્તુ પુરે મઙ્ગલમાસ્તાત્ ચિન્મયોઃ સમ્મેલનં વિધિઃ સઙ્ગીયતામ્ ॥ ૮૦॥

દેવાનાં પૂરયોધ્યા । તસ્યાꣳ” હિરણ્મયઃ કોશઃ ।
સ્વર્ગો લોકો જ્યોતિષાઽઽવૃતઃ । યો વૈ તાં બ્રહ્મણો વેદ ।
અમૃતેનાઽઽવૃતાં પુરીમ્ । તસ્મૈ બ્રહ્મ ચ” બ્રહ્મા ચ ।
આયુઃ કીર્તિં” પ્રજાન્દદુઃ ઇતિ સામવેદે તૈત્તરીયા શ્રુતિઃ ॥ ૮૧॥

પદ્મપુરાણે શિવ વાક્યમ્-
વિષ્ણોઃ પાદમવન્તિકાં ગુણવતીં મધ્યે ચ કાઞ્ચીમ્પુરીં
નાભૌ દ્વારવતીં તથા ચ હૃદયે માયાપુરીં પુણ્યદામ્ ।
ગ્રીવામૂલ મુદાહરન્તિ મથુરાં નાસાગ્ર વારાણસી
મેતદ્બ્રહ્મપદંવદન્તિ મુનયોઽયોધ્યાપુરીં મસ્તકે ॥ ૮૨॥

મથુરાદ્યાઃ સર્વ પુર્યોધ્યયોધ્યાપુર દાસિકાઃ ।
અયોધ્યામેવ સેવન્તે પ્રલયે પ્રલયેપિ ચ ॥ ૮૩॥

અયોધ્યાવાસિનસ્સર્વે જગન્નાથસ્યમૂર્તયઃ ।
ઈશ્વરેણપુરા પ્રોક્તં પાર્વત્યૈ ચ કદાચન ॥ ૮૪॥

સરયૂ તમસયોર્મધ્યે ધવલગ્રામમન્તરે ।
અમરામરણમિચ્છન્તિ કા કથા ઇતરેજનાઃ ॥ ૮૫॥

મન્વન્તરસહસ્ત્રેષુ કાશી વાસે ન યત્ફલમ્ ।
તત્ફલં સમવાપ્નોતિ સરયૂ દર્શને કૃતે ॥ ૮૬॥

પ્રયાગેયો નરોગત્વા માઘાનાં દ્વાદશં વસેત્ ।
તત્ફલાદધિકં પ્રોક્તં સરયૂ દર્શને કૃતે ॥ ૮૭॥

મથુરાયાં કલ્પમેકં વસતે માનવો યદિ ।
તત્ફલાદધિકં પ્રોક્તં સરયૂ દર્શને કૃતે ॥ ૮૮॥

ગયાશ્રાદ્ધે ન યત્પુણ્યં પુરુષોત્તમ દર્શને ।
તત્ફલાદધિકં પ્રોક્તં સરયૂ દર્શને કૃતે ॥ ૮૯॥

પુષ્કરેષુ નરો યાતિ કાર્તિક્યાં કૃત્તિકાયુતે ।
તત્ફલાદધિકં પ્રોક્તં સરયૂ દર્શને કૃતે ॥ ૯૦॥

વસ્તવ્યં સરયૂ તીરે નીરેણોદર પૂરણમ્ ।
કદાચિત્પ્રાપ્યતે શાકં કા કથા પાકશાસને ॥ ૯૧॥

તત્ર પ્રમાણમાહ શ્રુતિઃ-
પ્રવાહ રૂપેણ ભવતિનામ્ના સરયૂ અહમેવાત્ર મનસા ।
જલરૂપેણ ચતર્યુગે ચ સરયૂ કલૌગઙ્ગા વસિષ્ઠજા ॥ ૯૨॥

પાદ્મે-
ષષ્ઠિવર્ષ સહસ્ત્રાણિ કાશી વાલે ન યત્ફલમ્ ।

તત્ફલં નિમિષાર્દ્ધેણ કલૌ દાશરથેઃ પુરી ॥ ૯૩॥

અન્યચ્ચ-
યસ્યાં ભાતિ પ્રમોદકાનનવરં રામસ્યલાલીસ્પદમ્
યત્ર શ્રીસરિતાંવરા ચ સરયૂ રત્નાચલઃ શોભતે ।
ધ્યેયા બ્રહ્મ મહેશ વિષ્ણુમુનિભિર્યાનન્દદા સર્વદા
સાયોધ્યાપરમાત્મનો વિજયતેધામ્નાં પરામુક્તિદા ॥ ૯૪॥

પદ -
તબ તજિ અવધપુરી રહિયે ॥ ટેક ॥

રામરૂપ હિય રામ નામ મુખ કર સેવા ગહિયે
મજ્જન પાન સદા સરય કો સમદુખ સુખ સહિયે ।
જહઁ તહઁ રામચરિત સુનિયે નિતસહજ સુખહિં લહિયે
શ્રીરામચરણ રઘુબીર કૃપાતે કછુ ફલનહિં ચહિયે ॥ ૯૫॥

ઇતિ શ્રીરામનવરત્નસારસઙ્ગ્રહે શ્રીરામલીલારૂપનામધામ સર્વોપરિ વર્ણન્નનામ ષષ્ઠંરત્નમ્ ॥ ૬॥

## અધ્યાય ૭

દોહા-
સુત કલત્ર ધન ધામ તન, માન સુજસ જગબન્ધ ।
રામચરન યહ સાત મેં, નેહ કરહિં તે અન્ધ ॥ ૧॥

તત્ર પ્રમાણ માહ અધ્યાત્મ્યે-
યથામેઘ વિતાનસ્થા વિદ્યુલ્લેખાતિ ચઞ્ચલા ।
આયુરપ્યગ્નિ સન્તપ્ત લોહસ્થ જલ વિન્દુવત્ ॥ ૨॥

આરણ્ય કાણ્ડે સુતીક્ષ્ણ વાક્યમ્-
મામદ્ય સર્વ જગતા મવિગોચરસ્ત્વમ્
ત્વન્માયયા સુત કલત્ર ગૃહાન્ધ કૂપે ।
મગ્નં નિરીક્ષ્ય મલ મુદગલ પિણ્ડ મોહ
પાશાનુવદ્ધ હૃદયં સ્વયમાગતોસિ ॥ ૩॥

કિષ્કિન્ધાકાણ્ડે શ્રીરામચન્દ્ર વાક્યં તારાં પ્રતિ-
મિથ્યારોપિતસંસારો ન સ્વયં વિનિવર્તતે ।
વિષયાન્ધ્યાયમાનસ્ય સ્વપ્નેમિથ્યાગમોયથા ॥ ૪॥

સ્વયમ્પ્રભોવાચ-
અદર્શનં ભવાર્ણાનાં સન્માર્ગ પરિદર્શનમ્ ।
ધન પુત્ર કલત્રાદિ વિભૂતિ પરિદર્પિતઃ ॥ ૫॥

અકિઞ્ચન ધનન્ત્વાદ્ય નાભિ ધાતું જનોર્હતિ ।
નિવૃત્તિ ગુણ માર્ગાય નિઃકિંષ્ચનધનાયતે ॥ ૬॥

તત્ર પ્રમાણ શ્રીમદ્ભાગવતે-
રાયઃ કલત્રં પશવઃ સુતાદયા ગૃહામહી કુઞ્જર કોશ ભૂતધઃ ।
સર્વેર્થ કામાઃ ક્ષણભઙ્ગુરાયુષઃ કુર્વન્તિ મર્ત્યસ્યકિયત્ પ્રિયં ચલાઃ ॥ ૭॥

સંસાર કૂપે પતિતં વિષયૈર્મુષિતેક્ષણમ્ ।
ગ્રસ્તં કાલાહિ નાત્માનં કોન્યસ્ત્રાતુમિહેશ્વરઃ ॥ ૮॥

તત્ર પ્રમાણ ભર્તૃહરૌ-
ધન્યાનાઙ્ગિરિ કન્દરેષુવસતાં જ્યોતિઃ પરં ધ્યાવ્રતા-
માનન્દાશ્રુ કણાન્પિવન્તિ શકુનાઃ નિશ્શઙ્કમઙ્કે શયાઃ ।
અસ્માકન્તુ મનોરથો પરચિતે પ્રાસાદવાપીતટે
ક્રીડા કાનન કેલિ કૌતુક યુષામાયુઃ પરક્ષીયતે ॥ ૯॥

ભોગેરોગ ભયં કુલેચ્યુતિમયં વિત્તેનૃપાલાદ્ભયં
માને દૈન્યમયં વલેરિપુ ભયં રૂપે જરાયા ભયમ્ ।
શાસ્ત્રવાદિ ભયં ગુણેનતિભયઙ્કાયે કૃતાન્તાદ્ભયં
સર્વવસ્તુ ભયાવહં ભુવિનૃણાં વૈરાગ્યમેવાભયમ્ ॥ ૧૦॥

આસાનામનદીમનોરથ જલા તૃષ્ણા તરઙ્ગાકુલા
રાગગ્રાહવતી વિતર્ક વિહગા ધૈર્ય્યદ્રુમ ધ્વંશિની ।
મોહાવર્ત સુદુસ્તરાતિ ગહનાપ્રોતુગં ચિન્તાતટી
તસ્યાઃ પારગતાવિશુદ્ધમનસોનન્દન્તિયોગીશ્વરાઃ ॥ ૧૧॥

કૌપીનં શતખણ્ડ જર્જરતરં કન્થાપુનસ્તાદૃશી
નૈશ્ચિત્યં નિરપેક્ષ ભૈક્ષમસનં નિદ્રાસ્મશાને વને ।
સ્વાતન્ત્રેન નિરઙ્કુશં વિહરણં સ્વાન્તં પ્રશાન્તંસદા
સ્થૈર્યયોગમિદમ્ભવેદ્યદિતદા ત્રૈલોક્યરાજ્યેનકિમ્ ॥ ૧૨॥

અન્યચ્ચ-

આસાયાશ્ચૈવ યેદાસાસ્તે દાસાજગતામપિ ।
આસાન્દાસીકૃતાયેન તસ્યદાસાયતે જગત્ ॥ ૧૩॥

પ્રતિષ્ઠાશૂકરીવિષ્ઠા ગૌરવં શુધ્દ રૌરવમ્ ।
અતિમાનં સુરાપાનં ત્રયન્ત્યક્ત્વા સુખીનરઃ ॥ ૧૪॥

પતઙ્ગમાતઙ્ગ કુરઙ્ગ ભૃઙ્ગા મીનાહતાપઞ્ચભિરેવપઞ્ચ ।
એકઃ પ્રમાદસિકથન્નહન્યતેયઃ સેવિતેપઞ્ચભિરેવપઞ્ચ ॥ ૧૫॥

ઇતિ વૈરાગ્ય વર્ણનં

અથ સાધુ લક્ષણં વર્ણ્યતે-
તત્ર પ્રમાણમાહ મહારામાયણે શિવ વાક્યં, પાર્વતીં પ્રતિ-
મુગ્ધે શૃણુષ્વમનુજોપિ સહસ્ત્ર મધ્યે
ધર્મવ્રતીભવતિ સર્વ સમાન શીલઃ ।
તેષ્વેવ કોટિષુ ભવેદ્વિષયે વિરક્તઃ
સદ્જ્ઞાનકો ભવતિ કોટિ વિરક્તમધ્યે ॥ ૧૬॥

જ્ઞાનીષુ કોટિષુ નૃજીવનકોપિ મુક્તઃ
કશ્ચિત્સહસ્ત્ર નરજીવન મુક્તમધ્યે ।
વિજ્ઞાનરૂપ વિમલોત્પથધર્મ લીન
સ્તેષ્વેવ કોટિષુસકૃત્ ખલુરામ ભક્તઃ ॥ ૧૭॥

વાહ્યાન્તરં શૃણુ તથા ગિરિરાજ કન્યે
ત્વત્તોવદામિંરઘુનાથ જનસ્યમુખ્યમ્ ।
અન્યદ્વિહાયસકલં સદસચ્ચકાર્યમ્
શ્રીરામપઙ્કજપદં સતતં સ્મરન્તિ ॥ ૧૮॥

શ્રીરામનામ રસનાગ્રપઠન્તિભક્ત્યા
પ્રેમ્નાચ ગદગદગિરોપ્યથ હૃષ્ટલોમાઃ ।
સીતાયુતં રઘુપતિં ચ કિશોર મૂર્તિમ્
પશ્યઃ ત્યહર્નિશિ મુદા પરમેણરમ્યમ્ ॥ ૧૯॥

ભૂમૌજલેનભસિ દેવનરાસુરેષુ
ભૂતેષુદેવિસકલેષુ ચરાચરેષુ ।
પશ્યન્તિ શુધ્દ મનસા ખલુરામરૂપમ્
રામસ્યતે મુવિતલે સમુપાસકાશ્ચ ॥ ૨૦॥

શાન્તસ્સમાન મનસા ચ સુશીલયુક્ત
સ્તોષક્ષમા ગુણદયા રિજુબુદ્ધિ યુક્તઃ ।
વિજ્ઞાનજ્ઞાન વિરતિઃ પરમાર્થ વેત્તા
નિર્દ્ધામકોભયમનાઃ સ ચ રામભક્તઃ ॥ ૨૧॥

ભાલે ચ રમ્યતિલકં વિવરેખ દીપ્તમ્
રામાઙ્ઘ્રિવિન્દુ સહિતં સ ચ પીતમધ્યે ।
કણ્ઠે તથા તુલસિદામ લસદ્ભુજેવૈ
તપ્તેન વાણ ધનુષાઙ્કિત રામભક્તઃ ॥ ૨૨॥

અન્યચ્ચ ભગવદ્વાક્યમ્-
મદ્ભક્તઃ સરિતાં પતિ ચુલકવત્ ખદ્યોતવદ્ભાસ્કરમ્
મેરું પશ્યતિ લોષ્ટવત્ કિં પરમ્ભૂમેઃ પતિં ભૃત્યવત્ ।
ચિન્તા રત્નચયં શિલા સકલવત્ કલ્પદ્રુમ કાષ્ઠવત્
સંસારં તૃણરાશિવત્કિપરં દેહં નિજં ભારવત્ ॥ ૨૩॥

શ્રીમદ્ભાગવતે ભગવદ્વાક્યમ્-
કૃપાલુ રકતદ્રોહ સ્તિતિક્ષુઃ સર્વ દેહિનામ્ ।
સત્યસારોનવદ્યાત્મા સમઃ સર્વોપકારકઃ ॥ ૨૪॥

કામૈરહતીર્દાન્તો મૃદુશ્શુચિરકિચનઃ ।
અનીહોમિતભુક્ શાન્તસ્થિરોમચ્છરણોમુનિઃ ॥ ૨૫॥

અપ્રમત્તોગભીરાત્મા ધૃતવાન્ જિત ષડ્ગુણઃ ।
અમાનીમાનદઃ કલ્પોમૈત્રઃ કારુણિકઃ કવિઃ ॥ ૨૬॥

આજ્ઞાયૈવં ગુણાન્દોષાન્મયાદિષ્ટાનપિસ્વકાન્ ।
ધર્માન્સન્ત્યજ્યયઃ સર્વાન્ મામભજેત્સસત્તમઃ ॥ ૨૭॥

જ્ઞાત્વાજ્ઞાત્વાચ ય માંવૈ યાવાન્ યશ્ચાસ્મિયાદૃશઃ ।
ભજન્ત્યનન્યભાવેન તેમે ભક્ત તમામતાઃ ॥ ૨૮॥

મલ્લિઙ્ગ મદ્ભક્તજન દર્શનસ્પર્શનાચનમ્ ।
પરિચર્યાસ્તુતિપ્રહ્વ ગુણકર્માનુકીર્તનમ્ ॥ ૨૯॥

હરિરુવાચ જનકં પ્રતિ-
સર્વ ભૂતેષુ યઃ પશ્યેત ભગવદ્ભાવ માત્મનઃ ।
ભૂતાનિભગવત્યાત્મન્યેષ ભાગવતોત્તમઃ ॥ ૩૦॥

ઈશ્વરે તદધીનેષુ વાલિશેષુ દ્વિષત્સુ ચ ।
પ્રેમમૈત્રી કૃપોપેક્ષા યઃ કરોતિ સ મધ્યમઃ ॥ ૩૧॥

અર્ચાયામેવ હરયે પૂજાં યઃ શ્રદ્ધયેહતે ।
ન તદ્ભક્તેષુ ચાન્યેષુ સભક્તઃ પ્રાકૃતઃ સ્મૃતઃ ॥ ૩૨॥

કવિ વાક્યમ્-
ખંવાયુ મગ્નિંસલિલં મહીં ચ જ્યોતીંષિ સત્વાનિ દિશોદ્રુમાદીન ।
સરિત્સમુદ્રાંશ્ચ હરેઃ શરીરં યત્કિઞ્ચ ભૂતં પ્રણમેદનન્યઃ ॥ ૩૩॥

ભક્તિઃ પરેશાન્ભવોવિરક્તિ રન્યત્ર ચૈષત્રિક એકકાલઃ ।
પ્રપદ્યમાનસ્ય યથાશ્નતઃ સ્યુસ્તુષ્ટિઃ પુષ્ઠિઃ ક્ષુદપાયોનુઘાસમ્ ॥ ૩૪॥

ઇત્યુચ્યુતાઘ્રિં ભજતોનુવૃત્યા ભક્તિવિરક્તિર્ભગવત્ પ્રવોધઃ ।
ભવન્તિ વૈ ભાગવતસ્ય રાજન્ તતઃ પરાંશાન્તિમુપૈતિ સાક્ષાત્ ॥ ૩૫॥

ન કામ કર્મવીજાનાં યસ્યચેતસિ સમ્ભવઃ ।
વાસુદેવૈકનિલયઃ સવૈ ભાગવતોત્તમઃ ॥ ૩૬॥

ન યસ્ય જન્મ કર્મભ્યાં ન વર્ણાશ્રમ જાતિભિઃ ।
સજ્જતેસ્મિન્નહં ભાવોદેહેવૈ સહરેઃ પ્રિયઃ ॥ ૩૭॥

ન યસ્ય સ્વપર ઇતિવિત્તષ્વાત્મનિવાભિદા ।
સર્વ ભૂત સમઃ શાન્તઃ સવૈ ભાગવતોત્તમઃ ॥ ૩૮॥

ત્રિભુવનવિભવ હેતવેપ્યકુણ્ઠસ્મૃતિરજિતાત્મ ।
સુરાદિભિર્વિમૃગ્યાત્ ન ચલતિ ભગવત્પદારવિન્દા
લવ નિમેષાર્દ્ધમપિ યઃ સ વૈષ્ણવાગ્ર્યઃ ॥ ૩૯॥

તત્ર પ્રમાણમાહ અધ્યાત્મે વાલ્મીકિ વાક્ય, શ્રીરામં પ્રતિ-
ત્વન્મન્ત્ર જાપકોયસ્તુ ત્વામેવ શરણં ગતઃ ।
નિર્દ્વન્દોનિસ્પૃહસ્તસ્ય હૃદયં તવ મન્દિરમ્ ॥ ૪૦॥

નિરહઙ્કારિણઃ શાન્તા રાગદ્વેષ વિવર્જિતાઃ ।
સમલોષ્ટાસ્મ કનકાસ્તેષાં તે હૃદયં ગૃહમ્ ॥ ૪૧॥

ત્વયિદત્તમનોબુદ્ધિર્યઃ સન્તુષ્ટઃ સદાભવેત્ ।
ત્વયિ સંશક્ત કર્માયસ્તન્મનસ્તે શુભઙ્ગૃહમ્ ॥ ૪૨॥

યો ન દ્વેષ્ટ્યપ્રિયમ્પ્રાપ્ય પ્રિયં પ્રાપ્ય ન હૃષ્યતિ ।

સર્વં માયેતિ નિશ્ચિત્ય ત્વાં ભજેતન્મનોગૃહમ્ ॥ ૪૩॥

પડ્ભાવાદિવિકારાન્ યો દેહે પશ્યતિ નાત્મનિ ।
ક્ષુત્તટ્સુખમ્ભય દુઃખ પ્રબુદ્ધા ન નિરીક્ષ્યતે ॥ ૪૪॥

સંસાર ધર્મૈનિમક્ત સ્તસ્યતે માનસં ગૃહમ્ ॥ ૪૫॥

પશ્યન્તિ યે સર્વ ગુહાસયસ્થં ત્વાં ચિદ્ધનં સત્યમનન્તમેકમ્ ।
અલેપકં સર્વગતં વરેણ્યં તેષાં હૃદબ્જે સહસીતયા બસ ॥ ૪૬॥

નિરન્તરાભ્યાસ દૃઢીકૃતાત્મનાં ત્વત્પાદ સેવા પરિ નિષ્ઠિતાનામ્ ।
ત્વન્નામ કીર્ત્યા ઇતકલ્મષાણાં સીતાસમેતસ્યગૃહં હૃદબ્જે ॥ ૪૭॥

રામત્વન્નામ મહિમા વર્ણ્યતે કે ન વા કથમ્ ।
યત્પ્રભાવાદહં રામ બ્રહ્મર્ષિત્વ મવાપ્તવાન્ ॥ ૪૮॥

પદ-
કબહુઁક યહ ગુન મન ધરિ હૈ ॥ ટેક ॥

કામ ધામ ધન દેહ સનેહી તઁહ ન નેહ કરિ હૈ ।
જહઁ લગિ વિષય વિલાસ, રામ બિનુ વિષ સમ લખિ ડરિ હૈ ॥

માન પમાન મિત્ર અરિ, સુખ દુખ સમ કરિ આચરિ હૈ ।
ક્રૂર વચન સુનિ વિષમ અગ્નિ સમ, જલહ્નિ નહિં જરિ હૈ ॥

સર્વ ભૂત હરિ રૂપ કહત શ્રુતિ, કબહુઁ દેખિ પરિ હૈ ।
સમ સન્તોષ જ્ઞાન ભાજન કરિ, રામ ચરિત ભરિ હૈ ॥

પરહિત દયા ભક્તિ રઘુબર કી, સકલ કામ ટરિ હૈ ।
રામચરણ, શ્રીરામ કૃપા તે, ભવસાગર તરિ હૈ ॥ ૪૯॥

-ઇતિ શ્રીરામનવરત્ન સારસઙ્ગ્રહે સાધુલક્ષણ વર્ણનનાં સપ્તમ રત્નમમ્ ॥ ૭॥

## અધ્યાય ૮

સન્ત સભા સુખસિન્ધુ સમ મથવ બ્રહ્મજિજ્ઞાસ ।
રામરૂપ ગુણ રત્ન ભવ રામચરણ અનયાસ ॥ ૧॥

વન્દે સન્ત સમાજમમ્બુધિપતિં ગાધન્તુનો પાયકૈઃ
રામોનામ રમારમેશ ઇતિયત્વિજ્ઞાનરૂપઃ ફણી ।

જાતોરામ કથેન્દુરેવ કિરણૈસ્તાપત્રયોન્મૂલનો
યત્ર પ્રેમ પયોથ રામચરણસ્તેભ્યોપિસદ્ભયોનમઃ ॥ ૨॥

શ્રીમદ્રામ સ્વરૂપતોં જન વપુર્ભિન્નન્નજાતં ક્વચિત્
મીનાદ્યા રઘુનાથ યાદવ પતિસ્સર્વે વતારાયથા ।
ઇત્થં યે પ્રતિબોધયન્તિસ્વજનાન્નામઃ પ્રસન્નઃ સદા
નિત્યં ચૈવનમામિ રામચરણસ્તાંવૈ સદા સેવકાન્ ॥ ૩॥

જાડ્યન્ધિયોહરતિ સિઞ્ચતિ સત્યવાક્યં માનોન્નતિ દિશતિ પાપમપા કરોતિ ।
ચેતઃ પ્રસાદયતિ દિક્ષુ તનોતિ કીર્તિં સત્સઙ્ગતિઃ કથયકિન્ન કરોતિ પુંસામ્ ॥ ૪॥

શ્રીભાગવતે ચ-
તુલાયામ લવે નાપિ ન સ્વર્ગં ના પુનર્ભવમ્ ।
ભગવત્સઙ્ગિ સઙ્ગસ્ય મર્ત્યાનાં કિમુતાશિષઃ ॥ ૫॥

એકાદશે જનક વાક્યમ્-
દુર્લભોમાનુષોદેહો દેહિનાં ક્ષણ ભઙ્ગુરઃ ।
તત્રાપિ દુર્લભમ્મન્યે વૈકુણ્ઠ પ્રિયદર્શનમ્ ॥ ૬॥

તત્રૈવ ભગવદ્વાક્યમ્-
નરોધયતિ માં યોગો ન સાઙ્ખ્યં ધર્મ ઉદ્ધવ ।
ન સ્વાધ્યાય તપસ્ત્યાગો નેષ્ટા પૂર્તં ન દક્ષિણા ॥ ૭॥

વ્રતાનિ યજ્ઞ છન્દાંસિ તીર્થાનિ નિયમા યમાઃ ।
યથા વરુન્ધે સત્સઙ્ગઃ સર્વ સઙ્ગાયહોહિ મામ્ ॥ ૮॥

સત્સઙ્ગે નહિ દૈતેયા યાતુધાનાઃ ખગા મૃગાઃ ।
ગન્ધર્વાપ્સરસો નાગાઃ સિદ્ધાશ્ચારણ ગુહ્યકાઃ ॥ ૯॥

વિદ્યાધરા મનુષ્યેષુ વૈશ્યાઃ શૂદ્રાસ્ત્રિયોન્ત્યજાઃ ।
રજસ્તમઃ પ્રકૃતયસ્તસ્મિં તસ્મિં યુગે નઘ ॥ ૧૦॥

વહવોમત્પદં પ્રાપ્તાસ્ત્વાષ્ટ્ર કાથાધવાદયઃ ।
વૃષપર્વા બલિર્વાણો મયશ્ચાથ વિભીષણઃ ॥ ૧૧॥

સુગ્રીવો હનુમાનૃક્ષોગજો ગૃદ્ધો બણિકપથઃ ।
વ્યાધઃ કુબ્જાબ્રજેગોપ્યો યજ્ઞ પત્ન્યસ્તથાપરે ॥ ૧૨॥

તેનાધીત શ્રુતિગણાનોપાસિત મહત્તમાઃ ।

અવૃતા તપ્ત તપસઃ સત્સઙ્ગાન્ મામુપાગતા ॥ ૧૩॥

અધ્યાત્મ રામાયણે પરશુરામ વાક્યં શ્રીરામં પ્રતિ-
યાવત્ત્વત્પાદ ભક્તાનાં સઙ્ગ સૌખ્યં ન વિન્દતિ ।
તાવત્સંસાર દુઃખૌઘાન્નનિવર્તેન્નરઃ સદા ॥ ૧૪॥

સત્સઙ્ગલબ્ધયાભક્ત્યા યદા ત્વાં સમુપાસતે ।
તદામાયા શનૈર્યાતિ તાનવં પ્રતિ પદ્યતે ॥ ૧૫॥

તતસ્ત્વદ્ જ્ઞાન સમ્પન્નઃ સદ્ગુરુસ્તસ્ય લભ્યતે ।
વાક્યજ્ઞાનં ગુરોર્લબ્ધ્વાત્વત્પ્રસાદાદ્વિમુચ્યતે ॥ ૧૬॥

તસ્માત્ત્વદ્ભક્તિ હીનાનાં કલ્પ કોટિ શતૈરપિ ।
ન ભુક્તિર્ન ચ વિજ્ઞાન શક્યં નૈવ સુખં તથા ॥ ૧૭॥

અતસ્ત્વત્પાદ યુગલે ભક્તિર્મે જન્મ જન્મનિ ।
સ્યાત્ત્વદ્ભક્તિમતાં સઙ્ગો વિદ્યાયાભ્યાંવિનશ્યતિ ॥ ૧૮॥

લોકે ત્વદ્ભક્તિનિરતાસ્ત્વદ્ધર્મામૃતવર્ષિણઃ ।
પુનન્તિ લોકમખિલં કિં પુનઃ સ્વકુલોદ્ભવાન્ ॥ ૧૯॥

નમોસ્તુ જગતાં નાથ નમસ્તે ભક્તિ ભાવન ।
નમઃ કારુણિકાનન્ત રામચન્દ્રનમોસ્તુતે ॥ ૨૦॥

અધ્યાત્મે સુન્દરકાણ્ડે શુકસારણ વાક્યં રાવણં પ્રતિ-
સત્સઙ્ગતિં કુરુ ભજસ્વ હરિં શરણ્યં શ્રીરાઘવં મરકતોપલકાન્તિકાન્તમ્ ।
સીતાસમેતમનિશં ધૃતચાપબાણં સુગ્રીવલક્ષ્મણવિભીષણસેવિતાઙ્ઘ્રિમ્ ॥ ૨૧॥

મોહમુદ્ગરે-
નલિનીદલગતજલવત્તરલં તદ્વજ્જીવનમતિશયચપલમ્ ।
ક્ષણમપિ સજ્જન સઙ્ગતિરેકા ભવતિ ભવાર્ણવતરણે નૌકા ॥ ૨૨॥

આદિપુરાણે-
ગગા પાપં શશી તાપં દૈન્યં કલ્પતરુસ્તથા ।
પાપં તાપં તથા દૈન્યં હન્તિ સાધુ સમાગમઃ ॥ ૨૩॥

શ્રીભાગવત કપિલ વાક્યં દેવહુતીં પ્રતિ-
પ્રસઙ્ગમજરમ્પાશ માત્મનઃ કવયો વિદુઃ ।
સ એવ સાધુ સુકૃતો મોક્ષ દ્વારમપાવૃતઃ ॥ ૨૪॥

તિતિક્ષવઃ કારુણિકાઃ સુહૃદસ્સર્વદેહિનામ્ ।
અજાતશત્રવઃ શાન્તાઃ સાધવઃ સાધુ ભૂષણઃ ॥ ૨૫॥

મચ્યનન્યેન ભાવેન ભક્તિં કુર્વન્તિ યે દૃઢામ્ ।
મત્કૃતેત્યક્ત કર્માણસ્ત્યક્ત સ્વજનબાન્ધવાઃ ॥ ૨૬॥

ઇતિ સત્સઙ્ગ વર્ણનં

બ્રહ્માણ્ડપુરાણે-
દુર્લભોવૈષ્ણવો લોકે દુર્લભં વૈષ્ણવં બ્રતમ્ ।
દુર્લભાવૈષ્ણવીભક્તિઃ સધન્યો યત્રવર્તતે ॥ ૨૭॥

નરસ્તસ્યોપદેશેન નીચોપિ ગુરુતામ્બ્રજેત્ ।
પારદેન યથાતાચે કાઞ્ચનત્વં પ્રજાયતે ॥ ૨૮॥

શ્રીભાગવતે-
ન હ્યમ્મયાનિ તીર્થાનિ ન દેવા મૃચ્છિલામયાઃ ।
તે પુનત્યુરુકાલેન દર્શનાદેવ સાધવઃ ॥ ૨૯॥

અન્યચ્ચ ભગવદ્વાક્યં બ્રહ્માણં પ્રતિ-
નૈવેદ્યં પુરતોમહ્યં ચક્ષુષા ગૃહ્યતેમયા ।
રસન્દાસસ્ય જિહ્વાયા દશ્નામિ કમલોદ્ભવ ॥ ૩૦॥

પદ્મપુરાણે-
નૈવેદ્યં જગદીશસ્ય અન્નપાનાદિકં ચ યત્ ।
ભક્ષ્યાભક્ષ્ય વિચારસ્તુનાસ્તિતદ્ભક્ષણેક્વચિત્ ॥ ૩૧॥

વિષ્ણાનૈવેદ્યં ભોક્તવ્યં કોટિ જન્માઘ નાશનમ્ ।
તદેવાષ્ટ ગુણં પાપં સિક્થં ભૂમિ નિપાતનાત્ ॥ ૩૨॥

શ્રીભાગવતે-
મહદ્વિચલનં નૃણાં ગૃહીણાં દીન ચેતસામ્ ।
નિઃશ્રેયસાય ભગવન્ કલ્પતે નાન્યથા કચિત્ ॥ ૩૩॥

રઘૂગણૈતત્ તપસા ન યાતિ ન ચેજ્યા નિર્વપણાદ્ ગૃહાદ્વા ।
ન છન્દસા નૈવ જલાગ્નિ સૂર્યૈર્વિના મહત્પાદરજોભિષેકમ્ ॥ ૩૪॥

ભગવદ્વાક્યમ્-
અહં ભક્ત પરાધીનો અસ્વતન્ત્ર ઇવ દ્વિજ ।

સાધુભિર્ગ્રસ્ત હૃદયોભક્તૈર્ભક્તજનપ્રિયઃ ॥ ૩૫॥

સાધવો હૃદયં મહ્યં સાધૂનાં હૃદયં ત્વહમ્ ।
મદન્યત્તેનજાનન્તિ નાહં તેભ્યો મનાગપિ ॥ ૩૬॥

સ્કાન્દે-
ગીતાદિસ્તવ પાઠેન ગોવિન્દસ્ય ચ કીર્તનાત્ ।
સાધુર્દર્શન માત્રેણ કોટિ તીર્થ ફ્લંલભેત્ ॥ ૩૭॥

પાદ્મે-
કુલં પવિત્રં જનનીકૃતાર્થા વસુન્ધરાભાગવતી ચ ધન્યા ।
સ્વર્ગેસ્થિતા તે પિતરશ્ચ ધન્યા યેષાં કુલે વૈષ્ણવનામધ્યેયમ્ ॥ ૩૮॥

શુદ્ધં ભાગવતસ્યાન્નં શુદ્ધં ભાગીરથી જલમ્ ।
શુદ્ધંવિષ્ણુપદં તીર્થં શુદ્ધં વૈષ્ણવ દર્શનમ્ ॥ ૩૯॥

તિસ્રઃ કોટ્યર્દ્ધ કોટીશ્ચ તીર્થાનિ ભુવનત્રયે ।
વૈષ્ણવાન્ધિજલાત્ પુણ્યઙ્કોટિ ભાગેનનોસમમ્ ॥ ૪૦॥

નાતઃ પરતરં તીર્થ વૈષ્ણવાન્ધિ જલાત્ શુભાત્ ।
તેષાં પાદોદકં નિત્યં ગઙ્ગામપિ પુનાતિહિ ॥ ૪૧॥

રામભક્તાનુશેષન્તુ યોહિ ભુઙ્ક્તે દિને દિને ।
સિક્થે સિક્થે ભવેત્પુણ્યં ચાન્દ્રાયણશતાધિકમ્ ॥ ૪૨॥

કોટિ જન્માર્જિતં પાપં જ્ઞાનતો જ્ઞાનતો પિ વા ।
સદ્યઃ પ્રણશ્યતે નૃણાં વૈષ્ણવોચ્છિષ્ટ ભોજનાત્ ॥ ૪૩॥

આગમેપિ-
આસ્ફોટયન્તિ પિતરો નૃત્યન્તિ ચ મુહુર્મુહુઃ ।
મહંશે વૈષ્ણવો જાતઃ સનો ત્રાતા ભવિષ્યતિ ॥ ૪૪॥

તાવદ્ભ્રમન્તિ સંસારે પિતરો પિણ્ડ તત્પરાઃ ।
યાવદ્વંશે સુતોરામ ભક્તિ યુક્તો ન જાયતે ॥ ૪૫॥

સદાતિષ્ઠન્તિ તત્રૈવ સર્વ તીર્થાનિ દેવતાઃ ।
નિમિષં નિમિષાર્હેણ યત્રતિષ્ઠન્તિ વૈષ્ણવાઃ ॥ ૪૬॥

શ્રીભાગવતે-
વિપ્રાદ્દ્વિષડ્ગુણયુતા દરવિન્દ નાભ પાદાર્વિન્દ વિમુખાત્સ્વપચં વરિષ્ઠમ્ ।

મન્ચેતદર્પિત મનો વચને હિતાર્થ પ્રાણં પુનાતિ સકુલં નતુ ભૂરિમાનઃ ॥ ૪૭॥

અન્યચ્ચ ભગવદ્વાક્યમ્-
યથાખરશ્ચન્દન ભારવાહી ભારસ્યવેત્તા ન તુ ચન્દનસ્ય ।
તથાહિવિપ્રા ષટ્ શાસ્ત્ર યુક્તા મદ્ભક્તહીનાઃ ખરવહન્તિ ॥ ૪૮॥

ચાણ્ડાલમપિ મદ્ભક્તં નાવમન્યેત્ બુદ્ધિમાન્ ।
અવમન્યેદ્ધિ મૂઢાત્મા રૌરવં નરકં વ્રજેત્ ॥ ૪૯॥

પદ્મપુરાણે શિવ વાક્યમ્-
તુલસી કાષ્ઠ સમ્ભૂતાં માલિકાં યમકિઙ્કરાઃ ।
દૃષ્ટ્વા નશ્યન્તિ દૂરેણ વાતોદ્ધૃતં યથાધનમ્ ॥ ૫૦॥

ધારયતિ ન યે માલાં હૈતુકાઃ પાપ બુદ્ધયઃ ।
નરકાન્નનિવર્તન્તે દગ્ધાઃ કોપાગ્નિનાહરેઃ ॥ ૫૧॥

તુલસી માલિકાં ધૃત્વાયોભુક્તો ગિરિનન્દિનિ ।
સિક્થે સિક્થે સ લભતે વાજિપેય શતાધિકમ્ ॥ ૫૨॥

સ્નાનકાલેપિયસ્યાઙ્ગે દૃશ્યતે તુલસી શુભા । ૧૧૦
ગઙ્ગાદિ સર્વ તીર્થેષુ સ્નાતં તે ન ન સંશયઃ ॥ ૫૩॥

અન્તકાલેપિ યસ્યાઙ્ગં તુલસી માલિકાસ્પૃશેત્ ।
તસ્યદેહોદ્ભવં પાપં તત્ક્ષણાદેવ નશ્યતિ ॥ ૫૪॥

કણ્ઠેશિરસિ વાહૂભ્યાં કર્ણયોઃ કરયોસ્તથા ।
વિભ્રિયાત્તુલસીયસ્તુ સ જ્ઞેયો વિષ્ણુના સમઃ ॥ ૫૫॥

યજ્ઞસૂત્રં વિનાવિપ્રાઃ વેદ હીના ક્રિયા યથા ।
સત્યહીનં યથા વાક્યં માલાહીના ન વૈષ્ણવાઃ ॥ ૫૬॥

બ્રાહ્મણાનાંયથા સન્ધ્યા ગૃહીણાં પિતૃ તર્પણમ્ ।
અદક્ષિણો યથા યજ્ઞો માલાહીના ન વૈષ્ણવાઃ ॥ ૫૭॥

તતઃ સર્વેષુ કાલેષુ ધાર્યા તુલસિ માલિકા ।
ક્ષણાર્દ્ધં તદ્ધિ હીનોપિ વિષ્ણુદ્રોહી ભવેન્નરઃ ॥ ૫૮॥

તત્ર પ્રમાણમ્-
અર્ચ્ચયે વિષ્ણૌશિલાધીગુરુષુ નરમતિર્વૈષ્ણવે જાતિ બુદ્ધિ વિષ્ણોર્વા વૈષ્ણવાનાં કલિમલ મથને પાદ તીર્થેમ્બુબુદ્ધિઃ
સિદ્ધે તન્નામ્નિ મન્ત્રે સકલ કલુષહે શબ્દસામાન્ય બુદ્ધિઃ શ્રીશેસર્વેશ્વરેશે તદિતર સમધીર્યસ્યવૈ નારકીસઃ ॥ ૫૯॥

નારદ પઞ્ચરાત્રે ભગવદ્વાક્યમ્-
બ્રહ્મચારી ગૃહસ્થશ્ચ વાણપ્રસ્થો યતિસ્તથા ।
ચત્વારાશ્રમાદ્યેતે પઞ્ચમો મદ્વિપાશ્રયઃ ॥ ૬૦ ॥

વર્ણાશ્રમાભિમાનેન શ્રુતેર્દાસો ભવેન્નરઃ ।
વર્ણાશ્રમવિહીનાશ્ચ તિષ્ઠન્તિ શ્રુતિમૂર્દ્ધનિ ॥ ૬૧ ॥

જાતિર્વિદ્યામહત્વં ચ રૂપ યૌવન મેવ ચ ।
યત્નેન વર્જનીયાવૈ પઞ્ચૈતેભક્તિ કણ્ટકાઃ ॥ ૬૨ ॥

યદાવાતાદિ દોષેણ મદ્‌ભક્તોમાઞ્ચ ન સ્મરેત્ ।
તદાસ્મરામ્યહં ભક્તં દદામિ પરમાં ગતિમ્ ॥ ૬૩ ॥

એકાદશે ભગવદ્વાક્યમ્-
સત્યેપ્રલીનાઃ સ્વર્યાન્તિ નરલોકં રજોલયાઃ ।
તમોલયાઇત્તુ નિરયં યાન્તિમામેવ નિર્ગુણાઃ ॥ ૬૪ ॥

મદર્પણં નિઃફ્લં વા સાત્વિકં નિજ કર્મતત્ ।
રાજસમ્ફલ સઙ્કલ્પ હિંસાપ્રાયાદિ તામસમ્ ॥ ૬૫ ॥

કૈવલ્યં સાત્વિકં જ્ઞાનં રજો વૈકલ્પિકન્તુયત્ ।
પ્રાકૃતં તામસં જ્ઞાનં મન્નિષ્ટં નિર્ગુણં સ્મૃતમ્ ॥ ૬૬ ॥

બનેતુ સાવિકો વાસો ગ્રામેરાજસ ઉચ્યતે ।
તામસં દ્યૂત સદનં મન્નિકેતન્તુ નિર્ગુણમ્ ॥ ૬૭ ॥

સાત્વિકઃ કારકાંસઙ્ગી રાગાન્ધોં રાજસઃ સ્મૃતઃ ।
તામસઃ સ્મૃતિઃ વિભ્રષ્ટોનિર્ગુણોમદ્વિપાશ્રયઃ ॥ ૬૮ ॥

સાત્વિક્યા ધ્યાત્મકીશ્રદ્ધા કર્મ શ્રદ્ધાતુ રાજસી ।
તામસ્યધર્મે યા શ્રદ્ધામત્સેવાયાન્તુ નિર્ગુણાઃ ॥ ૬૯ ॥

પથ્યં પૂત મનાયસ્તમાહાર્યૈ સાત્વિકંસ્મૃતમ્ ।
રાજસં ચેન્દ્રિયપ્રેષ્ઠં તામસં ચાર્તિદાશુચિ ॥ ૭૦ ॥

સાત્વિકં સુખમાત્મોત્થં વિષયોત્થતું રાજસમ્ ।
તામસં મોહ દૈન્યોત્થં નિર્ગુણં મહિપાશ્રયમ્ ॥ ૭૧ ॥

શ્રીભગવદ્ગીતાયામ્-
જન્મ કર્મ ચ મેદિવ્ય મેવં યો વેત્તિ તત્વતઃ ।

ત્યક્ત્વાદેહં પુનર્જન્મ નૈતિ મામેતિ સોર્જુજ ॥ ૭૨॥

બ્રહ્મઃ ભૂત પ્રસન્નાત્મા ન શોચતિ ન કાઙ્ક્ષતિ ।
સમઃ સર્વેષુ ભૂતેષુ મદ્ભક્તિં લભતે પરામ્ ॥ ૭૩॥

દેવી હ્યેષા ગુણમયીમ મમાયા દુરત્તયા ।
મામેવ યે પ્રપદ્યન્તે માયા મે તાં તરન્તિ તે ॥ ૭૪॥

અન્યચ્ચ-
હરેર્દ્ધર્મ પરિત્યાગી સક્ય માનો નરાધમઃ ।
અસક્તસ્ય પરિત્યાગે ન દોષા ચિન્ત્યયેદ્યદિ ॥ ૭૫॥

શ્રીભાગવતે-
ગૃહેષુ વસતાં વાપિ પુંસાં કુશલ કર્મણામ્ ।
મદ્વાર્તા યાત યામાનાં ન બન્ધાય ગૃહામતાઃ ॥ ૭૬॥

પ્રહ્લાદ વાક્યમ્-
તત્સાધુમન્યે સુરવર્યદેહિનાં સદા સમુદ્વિનધિપા મસદ્ ગૃહાત્ ।
હિત્વાત્મપાતં ગૃહ મન્ધ કૂપં વનં ગતોશ્રીરામ-નવરત ।
યદ્ધરિ માશ્રયેત્ ॥ ૭૭॥

ક્ષણાર્હેણાપિ તુલયે ન સ્વર્ગે ન પુનર્ભવમ્ ।
ભગવત્સઙ્ગિ સઙ્ગસ્ય મર્ત્યાનાં કિમુતાશિષઃ ॥ ૭૮॥

એતેસત્પુરુષાઃ પરાર્થ ઘટકાઃ સ્વાર્થાન્પરિત્યજ્યયે
સામાન્યં પરસ્વાર્થમુદ્યમભૃતઃ સ્વાર્થા વિરોધે ન યેમ્ ।
તે મી માનુષરાક્ષસાઃ પરહિતં સ્વાર્થાય નિઘ્નન્તિ યે
પેતુઘ્નન્તિ નિરર્થકમ્પરહિતં તે કે ન જાનીમહે ॥ ૭૯॥

આગમસારે-
શાસ્ત્રદૃષ્ટં ગુરોર્વાક્યં તૃતીયં ચાત્મ નિશ્ચયમ્ ।
ત્રિવિધં યોભિ જાનાતિ સ મુક્તો જન્મબન્ધનાત્ ॥ ૮૦॥

શ્રુતિઃ ।
દશહસ્તાઙ્ગુલયો દશપાદ્યા દ્વાબુરૂ હૌ બાહૌ આત્મૈવ પઞ્ચવિંશકઃ ॥ ૮૧॥

પદ-
મન કહૅઁ જો સત સઙ્ગતિ ભાવે ॥ ટેક ॥

તૌ સબ વિષય વિલાસ છોડ઼ે કે સહજ પરમ સુખ પાવેમ્ ।
તીરથ જપ તપ નેમ દાન વ્રત વહુ જન્મનિ કરિ આવૈ ॥

શુદ્ધ હોય તતકાલ સન્તકે દરસ પરસ કર તાવૈ ।
યોગ વિરતિ વિજ્ઞાન કાલ વહુ શુદ્ધ સમાધિ લગાવૈ ॥

પરમતત્વ સોઇ એકૈ છિનમેં સત સઙ્ગતિ દરસાવૈ ।
બ્રહ્મલોક દિકપાલ લોક સુખ પર સુખ મોક્ષ કહાવૈ ।
તુલૈનછિન સતસઙ્ગસુખહિ કોરામચરણશ્રુતિગાવૈ ॥ ૮૨॥

ઇતિ શ્રીરામનવરત્નસારસઙ્ગ્રહે સત્સઙ્ગદર્શ પરસ સમ્ભાષણ સર્વોપરિપાવનપ્રાપ્તિવર્ણનં નામ અષ્ટમં રત્નમ્ ॥ ૮॥

## અધ્યાય ૯

દોહા
નષ સિષ સીતારામ છબિ, જબ લગિ હૃદય ન બાસ ।
રામચરણ સબ સાધના, તવ લગિ લખવ નિરાસ ॥ ૧॥

રામં નૌમિ કિરીટ કુણ્ડલયુતં ચણ્ડાંશુ કોટિ પ્રભમ્
વિદ્યુત્કોટિ વિનિન્દકં સુતિલકં રાજીવનેત્રં પરમ્ ।
રમ્યં કોટિ સમુદ્રસૂનુવદનં નાશાસ્ફુરન્મૌક્તિકમ્
સર્વાલઙ્કૃતભૂષિતં કર ધનુવમાઙ્કુ સીતાસ્થિતમ્ ॥ ૨॥

યસ્યાંશેન જગદ્બભૂવ સકલં બ્રહ્માહરિઃ શઙ્કુરો
યં ધ્યાયન્તિ મહર્ષયઃ સુમનસા સર્વેવતારા યતઃ ।
કીર્તિર્યસ્ય પુરાણ વેદ ભણિતાપારં ન તે વૈગતાઃ
નિત્યસ્થં પરધામ રામચરણોભક્ત્યા ભજેરાશિકમ્ ॥ ૩॥

સનત્કુમાર સંહિતાયાં વેદવ્યાસ વાક્યમ્-
શ્રીરામચન્દ્ર રઘુપુઙ્ગવ રાજવર્ય રાજેન્દ્ર રામ રઘુનાયક રાઘવેશ ।
રાજાધિરાજ રઘુનન્દન રામચન્દ્ર દાસોઽહમદ્ય ભવતઃ શરણાગતોઽસ્મિ ॥ ૪॥

વસિષ્ઠ સંહિતાયામ્-
રામસ્ય નામ રૂપં ચ લીલા ધામ પરાત્પરમ્ ।
એતચ્ચતુષ્ટયં નિત્યં સચ્ચિદાનન્દવિગ્રહમ્ ॥ ૫॥

શ્રીમદ્ભાગવતે શ્રીહનુમદ્વાક્યમ્-
સુરોઽસુરો વાપ્યથ વાનરો નરઃ સર્વાત્મના યઃ સુકૃતજ્ઞમુત્તમમ્ ।
ભજેત રામં મનુજાકૃતિં હરિં ય ઉત્તરાનનયત્કોસલાન્દિવમિતિ ॥ ૬॥

ન જન્મ નૂનં મહતો ન સૌભગં ન વાઙ્ન બુદ્ધિર્નાકૃતિસ્તોષહેતુઃ ।
તૈર્યદ્વિસૃષ્ટાનપિ નો વનૌકસશ્ચકાર સખ્યે બત લક્ષ્મણાગ્રજઃ ॥ ૭॥

નવમે શુક વાક્યમ્-
યસ્યામલં નૃપસદઃસુ યશોઽધુનાપિ ગાયન્ત્યઘઘ્નમૃષયો દિગિભેન્દ્રપટ્ટમ્ ।
તં નાકપાલવસુપાલકિરીટજુષ્ટપાદામ્બુજં રઘુપતિં શરણં પ્રપદ્યે ॥ ૮॥

એકાદશે યોગેશ્વર વાક્યમ્-
નિઃક્ષત્રિયામકૃત ગાં ચ ત્રિઃસપ્તકૃત્વો રામસ્તુ હૈહયકુલાપ્યયભાર્ગવાગ્નિઃ ।
સોઽબ્ધિં બબન્ધ દશવક્ત્રમહન્ સલઙ્કં સીતાપતિર્જયતિ લોકમલઘ્નકીર્તિઃ ॥ ૯॥

શ્રીધર વાક્યમ્-
ૐ નમઃ પરમહંસાસ્વાદિતચરણકમલચિન્મકરન્દાય
ભક્તજનમાનસનિવાસાય શ્રીરામચન્દ્રાય ॥ ૧૦॥

ભગવદ્ગીતાયાં શ્રીમદ્ભગવદ્વાક્યમ્-
સર્વ ધર્માન્પરિત્યજ્ય મામેકં શરણં વ્રજઃ ।
હત્વા સર્વ પાપેભ્યો મોક્ષયિષ્યામિમાશુચઃ ॥ ૧૧॥

અપિચેત્ સુ દુરાચારો ભજતે મામનન્યભાક્ ।
સાધુરેવ સ મન્તવ્યઃ સમ્યગ્ વ્યવસિતોહિસઃ ॥ ૧૨॥

શ્રીમદ્વાલ્મીકીય રામાયણે શ્રીરામચન્દ્ર વાક્યં, સુગ્રીવં પ્રતિ-
આનયેનં હરિશ્રેષ્ઠ દત્તમસ્યા ભયં મયા ।
વિભીષણો વા સુગ્રીવ યદિ વા રાવણઃ સ્વયમ્ ॥ ૧૩॥

સકદેવપ્રપન્નાય તવાસ્મીતિ ચ યાચતે ।
અભયં સર્વ ભૂતેભ્યો દદામ્યેતદ્વ્રતમમ ॥ ૧૪॥

અયોધ્યા કાણ્ડે પુરજન વાક્યમ્-
કથં ચિદુપકારેણ કૃતે નૈકે ન તુષ્યતિ ।
નસ્મરત્યપ કારાણાં શતમપ્યાત્મવત્તયા ॥ ૧૫॥

ઇતિ શરણાગતિ વર્ણનમ્ ।

અધ્યાત્મ્યે કિષ્કિન્ધા કાણ્ડે સુગ્રીવ વાક્યં, શ્રીરામં પ્રતિ-
ત્વત્પાદપદ્માર્પિતચિત્ત વૃત્તિસ્ત્વન્નામ સઙ્ગીત કથાસુવાણી ।
ત્વદ્ભક્ત સેવા નિયતૌ કરૌ મે ત્વદઙ્ગસઙ્ગં લભતાં મદઙ્ગમ્ ॥ ૧૬॥

ત્વન્મૂર્તિભક્તાન્ ચ ગુરું ચ ચક્ષુઃ પશ્યત્વજસ્રં સ શ ૃણોતુ કર્ણઃ ।
ત્વજન્મ કર્માણિ ચ પાદયુગ્મં વ્રજત્વજસ્રં તવમન્દિરાણિ ॥ ૧૭॥

અઙ્ગાનિ તે પાદ રજો વિમિશ્ર તીર્થાનિ વિભ્રત્વહિ શત્રુકેતો ।
શિરસ્ત્વદીયં ભવપદ્મજા દ્યૈર્યુષ્ટપદં રામ વ્રજવિજસ્રમ્ ॥ ૧૮॥

દારાઃ પુત્રં ધનં રાજ્યં સર્વેત્વન્માયયા કૃતમ્ ।
અતોહન્દેવ દેવેશ ન કાઙ્ક્ષ્યેન્યત્ પ્રસીદમે ॥ ૧૯॥

ન જીર્યતેપુનર્દીર્ઘં ભજતે સંસૃતિઃ પ્રભો ।
ત્વત્પાદ દર્શનાત્ સદ્યો નાશમેતિ ન સંશયઃ ॥ ૨૦॥

ક્ષણાર્દ્ધમપિયચ્ચિત્તં ત્વયિતિષ્ઠ ત્યચઞ્ચલમ્ ।
તસ્ય જ્ઞાન મનર્થાણાં મૂલં નશ્યતિ તત્ક્ષણાત્ ॥ ૨૧॥

આરણ્ય કાણ્ડે શ્રીરામચન્દ્ર વાક્યં શવરીં પ્રતિ-
યજ્ઞ દાન તપોભિર્વા વેદાધ્યયન કર્મભિઃ ।
નૈવં દ્રષ્ટુમહં શક્યો મદ્ભક્તિ વિમુખૈઃ સદા ॥ ૨૨॥

બ્રહ્માણ્ડ પુરાણે શ્રીરામગીતાયાં શ્રીરામવાક્યમ્-
મદ્ભક્ત માદરેદ્યસ્તુ મનઃ સ્પર્શન ભાષણૈઃ ।
તિમપિ પશ્યામિ વસિષ્ઠ મહતામિવ ॥ ૨૩॥

મદ્ભક્તેભ્યઃ પ્રયચ્છન્તિ સુવસ્તૂનિ ધનાન્યપિ ।
આતિથેયં કરિષ્યામિ તસ્યાહં સીતયા સહ ॥ ૨૪॥

શ્રીમદ્ભાગવતે ભગવદ્વાક્યમ્-
ભક્ત્યાહમેકયાગ્રાહ્યઃ શ્રદ્ધયાત્મા પ્રિયઃ સતામ્ ।
ભક્તિઃ પુનાતિમન્નિષ્ટાન્ સ્વપાકાનપિ સમ્ભવાત્ ॥ ૨૫॥

તતો દુસ્સઙ્ગમુત્સૃજ્ય સત્સુસજ્જેત બુદ્ધિમાન્ ।
સન્ત એતસ્યછિન્દતિ મનોવ્યાસઙ્ગ મુક્તિભિઃ ॥ ૨૬॥

સન્તોદિશન્તિ ચક્ષૂંષિ વહિરર્કઃ સમુત્થિતઃ ।
દેવતાવાન્ધવાઃ સન્તઃ સન્ત આત્માહમેવ ચ ॥ ૨૭॥

દ્વાદશે શિવ વાક્યમ્-
અથાપિ સંવદિષ્યામો ભવાન્યેતેન સાધુના ।
યહિ પરમો લાભોનૃણાં સાધુ સમાગમઃ ॥ ૨૮॥

ભાગવતે-
તિરસ્કૃતા વિપ્રલબ્ધા સપ્તાઃ ક્ષિપ્તા હતાશ્રપિ ।
નાસ્યતત્પ્રતિ કુર્વન્તિ તદ્ભક્તાઃ પ્રભવોપિહ ॥ ૨૯॥

પ્રાયસઃ સાધવો લોકે પરૈર્દ્વન્દ્વેષુ યોજિતાઃ ।
નવ્યથન્તિ ન હૃષ્યન્તિ યત આત્મા ગુણાશ્રયઃ ॥ ૩૦॥

એકાદશે-
દેવર્ષિભૂતાનૃણાન્પિતૃણાં ન કિઙ્કરો નાયમૃણ ચ રાજન્ ।
સર્વાત્મનાયઃ શરણં શરણ્યં ગતો મુકુન્દ પરિહૃત્ય કૃત્યમ્ ॥ ૩૧॥

પૃથુ પ્રકરણે-
સર્વત્રાસ્ખલિતાદેશઃ સપ્તદ્વીપૈક દણ્ડ ધૃક્ ।
અન્યત્ર બ્રાહ્મણ કુલાદન્યત્રાચ્યુત ગોત્રતઃ ॥ ૩૨॥

પ્રથમસ્કન્ધેપિ-
નૈષ્કર્મમપ્યચ્યુત ભાવવર્જિતં ન શોભતે જ્ઞાનમલં નિરજનમ્ ।
કુતઃ પુનઃ શશ્વદભદ્રમીશ્વરે ન ચાર્પિતં કર્મ યદપ્યકારણમ્ ॥ ૩૩॥

આત્મારામાશ્ચ મુનયો નિર્ગ્રન્થા અપ્યુરુક્રમે ।
કુર્વન્ત્યહૈતુકીં ભક્તિમિત્થમ્ભૂતગુણો હરિઃ ॥ ૩૪॥

દશમે બ્રહ્મણો વાક્યમ્-
શ્રેયસ્રુતિં ભક્તિ મુદસ્યતે વિભોક્લિયન્તિ યે કેવલ વોધલવ્ધયે ।
તેષામસૌ ક્લેશહિ એવ શિષ્યતે નાન્યયથાસ્થૂલ તુષાવ ઘાતિનામ્ ॥ ૩૫॥

યેન્યેરવિન્દાક્ષ વિમુક્તમાનિનસ્ત્વય્યસ્તભાવા દવિ
શુદ્ધ બુદ્ધયઃ આરુહ્ય કૃચ્છ્રેણ પરં પદં તતઃ પતન્ત્યધો
નાદૃત યુષ્મદમ્પ્રયઃ ॥ ૩૬॥

શ્રીમન્મહારામાયણે શિવ વાક્યં-
શ્રીરામં યે ચહિત્વા ખલમતિનિરતા બ્રહ્મજીવંવદન્તિ
તે મૂઢાનાસ્તિકાસ્તે શુભગુણ રહિતાઃ સર્વ બુદ્ધ્યાતિરિક્તાઃ ।
પાપિષ્ઠા ધર્મહીનાઃ ગુરુજનવિમુખા વેદશાસ્ત્રૈર્વિરુદ્ધા

તેહિત્વાગાઙ્ગમમ્ભો રવિકિરણ જલં પાતુમિચ્છન્ત્યતૃપ્તાઃ ॥ ૩૭॥

મર્ત્યા રામપાદૌ ક્ષિતિસુતવિમલા સંવિહાય બન્ધો
તે મઢા વોધહેતોઃ ધૃતપરિ ઘટને વારિ મન્થાન યુક્તાઃ ।
ય બ્રહ્માસ્મીતિ નિત્યં વદતિ હૃદિ વિના રામચન્દ્રાઙ્ઘ્રિ પદ્મં
તે બુદ્ધાસ્ત્યક્ત પોતાસ્તૃણ પરિ નિચયે સિન્ધુ મુયં તરન્તિ ॥ ૩૮॥

યે કેવલાદ્વૈતમતાનુરક્તા શ્રીરામમૂર્તિ વિમલાં વિહાય ।
તે પામદૃશ્યા હરિદશ્વમૂર્ત્તિઃ પશ્યન્તિમૂઢાઃ પ્રતિવિંવ કુમ્ભે ॥ ૩૯॥

યે રામભક્તિમમલાંશુ વિહાય રમ્યાં
જ્ઞાનેરતાઃ પ્રતિદિનં પરિક્કષ્ટમાર્ગે ।
આરાન્મહેન્દ્રસુરભિપરિહૃત્ય મૂર્ખા
અર્કે ભજન્તિ સુભગે સુખ દુગ્ધ હેતોઃ ॥ ૪૦॥

ત્યક્ત્વા શ્રીરઘુનન્દનં પર તરં નામ સ્વરૂપં તથા
બ્રહ્મણ્યેવવદન્તિ યે સદ સતઃ પૂર્ણ યથા કાશવત્ ।
તે વૈ તન્દુલ હેતવે તુષમહોનિઘ્નન્તિ દુર્બુદ્ધયઃ
છિત્વામૂલ મથાશ્રયન્તિ ચ દલન્તૈઃ સદ્ગુરુનાં કૃતઃ ॥ ૪૧॥

કિં વર્ણયામિ વિમલે વહુભિ પ્રકારૈઃ સીતાપતે ।
વિગત જ્ઞાન વિશેષ સર્વં જ્ઞાનં તદેવ કુસુમં ચ યથા ।
નભોગં સત્યં વદામિહ યથા ન સુખં ચ સ્વપ્ને ॥ ૪૨॥

શ્રીભાગવતે પ્રથમ નારદ વાક્યમ્ ।
ન યચચિત્ર પદહરેર્યશો જગત્ પવિત્રપ્રગ્રણીત
કર્હિચિત્ તદ્વાયસં તીર્થમુશન્તિ માનસા ન યત્ર હંસા-
વિરમન્ત્યુશકક્ષયા ॥ ૪૩॥

તદ્વાગવિસર્ગોજનતાઘ વિપ્લવોયસ્મિં પ્રતિશ્લોક
મવધ્યવત્યપિ નામાન્યનન્તસ્યયશોકિતાનિ યચ્છૃ-
ણ્વન્તિ ગાયન્તિ ગૃણન્તિ સાધવઃ ॥ ૪૪॥

નૂનં દેવેન નિહતા યેપ્યચ્યુત કથાસુધાં શ‍ૃણ્વન્ત્યસદ્ગાથાં પુરીષમિવવિડ્ભુજઃ ॥ ૪૫॥

એકાદશે-
તસ્માદ્ગુરું પ્રપદ્યેતજિજ્ઞાસુઃ શ્રેય ઉત્તમમ્ ।
શાબ્દે પરે ચ નિષ્ણાતં બ્રહ્મણ્યુપ સમાશ્રયમ્ ॥ ૪૬॥

તત્ર ભાગવતાન્ધર્મી શિક્ષેદ્ગુર્વાત્મ દૈવતઃ ।
શ્રમાયયા નુ વૃત્યા ચ યૈસ્તુષ્યે દાત્મદોહરિઃ ॥ ૪૭॥

નૃદેહમાદ્યં સુલભં સુદુર્લભમ્પ્લવં સુકલ્પં ગુરુકર્ણ ધારમ્ ।
મયાનુકૂલેન નભસ્વતેરિતમ્પુમાન્ ભવાબ્ધિં ન તરેત્સચાત્મહા ॥ ૪૮॥

શ્રીગુરુ ગીતાયામ્-
ગુરુર્બ્રહ્મા ગુરુર્વિષ્ણુ ગુરુર્દેવો મહેશ્વરઃ ।
ગુરુરેવ પરબ્રહ્મ તસ્મૈ શ્રીગુરવે નમઃ ॥ ૪૯॥

અખણ્ડ મણ્ડલાકારં વ્યાપ્તં યે ન ચરાચરમ્ ।
તત્પદં દર્શિતં યેન તસ્મૈ શ્રીગુરવે નમઃ ॥ ૫૦॥

પઞ્ચમે ઋષભદેવ વાક્યમ્-
ગુરુર્નસસ્યાત્સ્વજનો ન સઃ સ્યાત્પિતા ન સસ્યાજનની ન સાસ્યાત્ ।
દૈવં ન તત્સ્યાન્નપતિશ્ચ સસ્યાનમોચયેદ્યઃ સમુપેતમૃત્યુમ્ ॥ ૫૧॥

મહોદધૌ-
તદેવ લગ્નં સુદિનં તદેવ તારા વલં ચન્દ્ર વલં તદેવ ।
વિદ્યા બલં દેવ બલં તદેવ સીતાપતેર્નામ યદાસ્મરામિ ॥ ૫૨॥

ઇતિ ગુરુ લક્ષણં ગુરુ શરણાગતિ વર્ણનમ્ ।

શ્રીહનુમન્નાટકે-
રામત્વત્તરુણપ્રતાપ તપનત્રાસાદિવ ત્ર્યમ્બકો
નોગઙ્ગાં વિજહાતિનિસ્સરતિ ન ક્ષીરામ્બુધર્માધવઃ ।
તામ્યત્તામ રસાન્તરાલ વસતિર્દેવઃ સ્વયમ્ભૂરભૂત્
પાતાલાવધિપઙ્કુ મગ્ન વપુષસ્તિષ્ઠન્તિ કૂર્માદયઃ ॥ ૫૩॥

મહારાજ શ્રીમન જગતિ યશસા તે ધવલિતે ।
પયઃ પારાવારં પરમ પુરુષોયં મૃગયતે ।
કપર્દી કૈલાશં કુલિશ ભૃદ્ભૌમં કશ્ચિરમ્ ।
કલાનાથ રાહુઃ કમલભવનહંસ મધુના ॥ ૫૪॥

શત ચક્ર સમો વિષ્ણોઃ હર શૂલ શતઃ સમઃ ।
શત વજ સમશ્ચાસો રામવાણઃ પ્રતાપવાન્ ॥ ૫૫॥

તૂણે નૈક શરં કરેણ દશધા સન્ધાનકાલેશતમ્ ।
ચાપેભૂત સહસ્ત્ર લક્ષગમને કોટીચ કોટિર્વિધે ।

અન્તેર્વ નિખર્વવાણ વિવિધૈઃ સીતાપતીશોભિતઃ ।
એતદ્બાણ પરાક્રમસ્ય મહિમા સત્પાત્ર દાનયથા ॥ ૫૬॥

નાગાનામયુતં તુરઙ્ગ નિયુતં સાર્દ્ધં રથીનાં શતં
પત્તીનાં દશ કોટિ સન્નિપતિને નૃત્યત્કમ્બન્ધોરણે ।
એવં કોટિ કબન્ધ નર્તન વિધૌ નૃત્યે તથાખેચર-
સ્તેષાં કોટિક નર્તને રઘુપતેઃ કોદણ્ડઘણ્ટારવઃ ॥ ૫૭॥

વાલ્મીકીયે-
ન કાલસ્ય ન શક્રસ્ય ન વિષ્ણોર્વિત્તપસ્ય ચ ।
કર્માણિ તાનિશ્રૂયન્તે યાનિ યુદ્ધે હનૂમતઃ ॥ ૫૮॥

વાલ્મીકીયે ઉત્તર કાણ્ડે-
ઉપનૃત્યન્તિ કાકુત્સ્થં નૃત્યગીત વિશારદાઃ ।
દક્ષિણ્યોરુપવત્યશ્ચ સ્ત્રિયઃ સર્વ ગુણાન્વિતાઃ ॥ ૫૯॥

તથાતયોર્વિહરતોઃ સીતારાઘવયોશ્ચિરમ્ ।
દશ વર્ષસહસ્રાણિ ગતાનિ સુ મહાત્મનોઃ ॥ ૬૦॥

શ્રીમન્મહારામાયણે શઙ્કર વાક્યમ્ ।
મુનિવેષ ધરં રામં નીલ જીમૂત સન્નિભમ્ ।
રમન્તેયોષિતી ભૂતા રૂપં દૃષ્ટ્વા મહર્ષયઃ ॥ ૬૧॥

ઈપદ્બાસ્ય કૃતો રામો દૃષ્ટ્વા તેષામિમાં ગતિમ્ ।
યૂયં ધર્મતરા જ્ઞાનં મત્પ્રસન્નેહિ સામ્પ્રતમ્ ॥ ૬૨॥

રમિતારામમૂર્તીતે સ્ત્રિયોરૂપાસ્તપશ્ચરન્ ।
અતો દેવિ રમુક્રીડ઼ાા રામનામ્નૈવ વર્તતે ॥ ૬૩॥

શ્લોકૌયાભ્યાં નિર્જેષ્ટધ્યાયેત્-
રામંસાન્દ્ર ઘન સ્વરૂપમમલં સચ્ચિદ્ઘનાનન્દકમ્
વિદ્યુદ્દિવ્ય દુકૂલ પીત યુગલં શ્રીદામ વક્ષસ્થલમ્ ।
મઞ્જીરાઙ્ગદ રત્ન કઙ્કણ રણત્કાઞ્ચીલસન્મુદ્રિકમ્
મુક્તાહાર કિરીટ કુણ્ડલધનુઃ સચ્ચિત્રવાણોજ્વલમ્ ॥ ૬૪॥

કાશ્મીરી તિલકાલકાવૃતમુખં સાચીક્ષણંસસ્મિતમ્
તામ્બૂલાધર પલ્લવં રસમયં નાસાગ્ર મુક્તાફલમ્ ।
ધ્યાયેચ્છત્ર સુદિવ્ય ચામર યુતં સાકેત રત્નાસને

જાનક્યશમ્ભુજંસખીગણ વૃતં નિત્યં નિકુઞ્જેસ્થિતમ્ ॥ ૬૫॥

જી મન રામ સુધા રસ પાવૈ ॥ ટેક ॥

તૌકત સકલ વિષય મૃગ જલ લખિ તૃષિત વૃથા ઉઠિ ધાવૈ ।
અભય કરૌં સબ વિધિ શ્રીમુખ કહિ સકૃત શરણ કોઉ આવૈ ॥

તૌકત વિષય વિવસ સુર નર મુનિ તિન કહઁ વાદિ મનાવૈ ।
શ્રીરઘુબીર ભક્તિ ચિન્તામણિ સંસૃત બેગિ મિટાવૈ ॥

તેહિ તજિ જ્ઞાન જોગ તપ સાધૈ શ્રમ ફલ સબ શ્રુતિ ગાવે ।
અમિત મદન છવિ રામરૂપ રુચિ હૃદય નૈન લખિ આવૈ ॥

તૌકત ત્રિભુવન રૂપ જહાં લૌ લખિ શઠ જન્મ નસાવૈ ।
જો શ્રીરામ કૃપા પ્રતાપ ગુન શ્રીગુરુ શરણ લખાવૈ ॥

તૌકત ડરે લોક જમ કાલહિ સકલ રામ દરસાવૈ ।
યહ સિયવર નવરત્ન મનોહર દ્વાદશ રસહિ જનાવૈ ।
શ્રીરામચરણ નિત સુનત પઢ઼ત જો સો રઘુબર મન ભાવૈ ॥ ૬૬॥

ઇતિ શ્રીરામનવરત્નસારસઙ્ગ્રહે શ્રીરામરૂપગુણપ્રતાપ શરણાગત ભેદવર્ણનં નામ નવમં રત્નમ્ ॥ ૯॥

Proofread by Mrityunjay Pandey

*Shrirama Navaratnasara Sangrahah*
pdf was typeset on October 15, 2025

Please send corrections to *sanskrit@cheerful.com*